अथ षड्विद्यागमसांख्यायनतंत्रआरंभः

॥ श्रीमहागणाधिपतये नमः॥ श्रीशंकरनारायणगुरुमूर्तये
नमः॥ ॥ मध्ये सुधाब्धिमणिमंडपवेदिसंस्थे सिंहासनो
परिगतां परिपीतवर्णां॥ पीतांबराभरणमाल्यविभूषितां
गीं देवीं नमामि धृतमुद्गरवैरिजिह्वां॥१॥ कैलासशिखरा
सीनं गौरीवामांकसंस्थितं॥ भारतीपतिवाल्मीकशेषसन्नु
तमीश्वरं॥२॥ अष्टदिक्पालकैश्चाष्टविघ्नेशैश्च सेवितं
॥ भैरवाष्टकैर्देवं मातृमंडलवेष्टितं॥३॥ महापात्रुपगाकां
रं प्रमथैर्यावृतं प्रभुं॥ नारदः सनकुमारश्चैदं वचनमब्र
वीत्॥४॥ चापचर्यासुनिपुणो युद्धचर्यासु शंकरः॥ नानामा
यायिनेश्चैव ज्ञेतु भिद्यामिरासनं॥५॥ तस्योपायांश्च तद्विद्यां

2

वद मे करुणाकर॥ पुत्रोहं तव शिष्योहं कृपापात्रोहमेव च॥
॥६॥ श्रीईश्वर उवाच॥ ॥साधु साधु महाप्राज्ञ क्रौंचभेदनकोवि
द॥ ब्रह्मास्त्रेण विना शत्रुसंहारं न भवेत् क्वचित्॥७॥ तद्विद्यां च
प्रवक्ष्यामि त्रिषु लोकेषु दुर्लभं॥ पुत्रो देयः शिरो देयं न देयं य
स्य कस्य चित्॥८॥ ब्रह्मास्त्रस्य त्रिनामानि विद्यास्तंभमायामनु
स्तथा॥ प्रहस्तरोधिनी विद्या बगला च कुमारक॥९॥ मंत्रजी
वन विद्या च प्राणिप्रज्ञापहारकं॥ षट्कर्माधार विद्या च एते
पर्यायवाचकाः॥१०॥ षट्योगाश्रयाः हृः विद्या षड्विद्यागमभू
षिता॥ निरस्ताखिला विद्या त्रिशक्तिमयमेव च॥११॥ शां
तनेन विना शांति वश्यं चैव तु तद्विना॥ मोहनाकर्षणे चैव

3

विद्वेषोच्चाटनं तथा ॥१२॥ मारणं भ्रांतिरुद्वेगकरणं च कुमा
रकं ॥ विद्या च बगलानाम्नी मुनिगुह्ये स्वरूपावनं ॥१३॥ विना
च स्तंभिनी विद्या स्वविद्या चैन नासते ॥ तस्मादेतन्महा
विद्या कलौ मे सम्जीवनं ॥१४॥ पद्मजन्मादरा द्दिव्यां सां
ख्यायनमुनिं प्रति ॥ उपदेशक्रमेणैव उक्तवान्मेरुकंदरे
॥१५॥ तेन देवी कटाक्षेण कृतवानागमं भुवि ॥ मूलमंत्रो प
विद्याख्य अंगमंत्रोश्च विस्तरात् ॥१६॥ प्रयोगं चोपसंहारं
पदारा धनलक्षणं ॥ विस्तरेणोक्तवान स्मिंवक्ष्ये तत्स
र्वमादरात् ॥१७॥ स्वविद्यारक्षणी विद्या स्वमंत्रफलदायकं २
॥ स्वकीर्त्तिरक्षिणी विद्या शत्रुसंहारकारकं ॥१८॥ परविद्या

४

भेदनं च परयंत्रविदारणं ॥ परमंत्रप्रयोगेषु सदा विध्वंस
कारकं ॥१९॥ परानुष्ठानहरणं परकीर्त्तिविनाशनं ॥ परौ
षक्षयकृद्विद्या परेषां भ्रमकारकं ॥२०॥ ये वादिक्षयमि
छंति ये वा उन्नतक्षयं कलौ ॥ ये वा क्रूरग्रहेभ्यश्च क्षयमि
छंति मानवाः ॥२१॥ यछंति शांतिकर्माणि वश्यसंमोहना
दिकं ॥ विद्वेषोच्चाटनं पुत्र तेनोपास्यमिदं मनुं ॥२२॥ स्वतं
त्रदाय विधिना सद्गुरोर्मुखतस्तथा ॥ उपदेशक्रमेणैव
गृहीत्वा साधयेन्मनुं ॥२३॥ कुलाचारसमासक्तो कुलमा
र्गेण पूजकः ॥ दीक्षा कुलगुरोर्योगात् गृहीतव्यं स्वबुद्धिमा
न् ॥२४॥ साधयेत्कुलमार्गेण तेन मंत्रं प्रयोजयेत् ॥ उप

५

संहारणं तेन कर्त्तव्यं कुलयोगिना ॥२५॥ सौभाग्याद्यासमा
युक्तं सदा तर्पणपूर्वकम् ॥ सदा पूजासमायुक्तं चित्तिं न भव
ति ध्रुवं ॥२६॥ ऋषिसिद्धामरैश्चैव विद्याधरमहोरगैः ॥ यक्ष
गंधर्वनागाश्च पिशाचब्रह्मराक्षसैः ॥२७॥ पंचेंद्रियैश्च सं
चारं सद्योनाशाकरं मनुं ॥ पिंडब्रह्मांडजं जीवाश्च किं पुनः क्रौं
च भेदन ॥२८॥ ॥ ॥ इति श्रीषड्विद्यागमे सांख्यायनतंत्रे ई
श्वरक्रौंचभेदनसंवादे प्रथमः पटलः ॥१॥ ॥ ॥ ॥ क्रौं
चभेदन उवाच ॥ ॥ नमस्ते पार्वतीनाथ नमः पन्नगकंक
ण ॥ यद्दीक्षाविधिं तात वरदस्तं जनास्त्रयोः ॥१॥ श्री ईश्वर उ
वाच ॥ पुस्तके लिखितान्मंत्रान्नवलोक्य जपंति ये ॥ सजीवन्ते

वर्त्तांता लोकेन स्यानो भविष्यति ॥२॥ दीक्षामार्गं विना मंत्रं शै
वं वा शाक्तं वैष्णवं ॥ यो जपेन्नंद हत्याच्च देवता च प्रकुप्यति ॥
॥३॥ दीक्षाविधिं विना मंत्रं यो जपेत्कोटिकोटयः ॥ न स सिद्धि
मवाप्नोति सिंधुसैकतवर्षवत् ॥४॥ तस्मात्सर्वप्रयत्नेन दी
क्षां कुलगुरोर्मुखात् ॥ उपदेशक्रमेणैव मंत्रसंग्रहणं चै
रेत् ॥५॥ वेदवेदांगपारीणं वेदांतार्थस्व निश्चितं ॥ वैदिका
चारसंयुक्तं कुर्याद्गुरुमतंद्रितः ॥६॥ गर्जकौलागमासक्तं
नानाकौलपरायणं ॥ अष्टपाशविनिर्मुक्तं कुर्याद्गुरु
मतंद्रितः ॥७॥ पुरश्चरणसंतुष्टं मंत्रागमविशारदं ॥ उद्ध
र्तुं चैव संहर्तुं समर्थं सत्यवादिनं ॥८॥ प्रसन्नं जपे राज्ञो

न पारीणं नीतिकोविदं ॥ श्रीविद्यामंत्रयंत्रज्ञं कुर्याद्गुरुम
तं द्विजः ॥९॥ चक्रपूजासमासक्तं न्यासविद्याविशारदं
गुरुं यत्नात्स कर्त्तव्यः सततोसिद्धिकांक्षिभिः ॥१०॥ गुरुशुश्रू
षया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या
चतुर्थं नोपलभ्यते ॥११॥ शुश्रूषया गुरुं सम्यक् तोषयेद्भ
ष्टमन्वहं ॥ प्रसन्नश्चेत्तदा दत्ते मंत्रमुत्तममर्भक ॥१२॥ स्वल्पं
वा बहुलं वाथ शिष्यद्रव्यं गुरुः स्वयं ॥ गृहीत्वा मंत्रमादत्ते
विक्रीतं तदुदाहृतं ॥१३॥ राजसं चैव तद्विद्यान्नोगदं भुवि पुत्र
क ॥ विद्याप्रतिनिधिं विद्यायहृत्तं तामसं मतं ॥१४॥ मोक्षाप्र ४
त्तगुरुं पत्नात्शुश्रूषणैव तोषयेत् ॥ शुश्रूषणैव यल्लब्धं त

द्विद्या सर्वसिद्धिदं ॥१५॥ नोदेयं विद्यया विद्या वित्तकांक्षिनश्चैव
च ॥ सच्छिष्याय प्रदातव्यं धनदेहाद्यवंचकं ॥१६॥ दुरालापस
मासक्तं दुर्गुणेन समन्वितं ॥ सर्वदा वर्जयेच्छिष्यं गुरुसेवा
भिमानिनं ॥१७॥ अष्टपाशसमायुक्तं भ्रष्टाचारसमन्वितं
॥ सर्वदा वर्जयेच्छिष्यं गुरुसेवाविवर्जितं ॥१८॥ कामुकं कांच
नासक्तं करुणालज्जावर्जितं ॥ सर्वदा वर्जयेच्छिष्यं गुरुसे
वाभिमानिनं ॥१९॥ निर्मत्सरं निरालंबं नीतिशास्त्रवि
शारदं ॥ नित्यानित्यविवेकज्ञं शिष्यत्वेनोपकल्पयेत् ॥२०॥
श्रद्धाभक्तिसमोपेतं धनदेहाद्यवंचकं ॥ अष्टपाशविनि
र्मुक्तं शिष्यत्वेनोपकल्पयेत् ॥२१॥ गुरुशिष्यावुभौ मोहा

दपरीक्ष्यपरस्परं॥ उपदेशादद्दत्वा हन्यान्मूर्खानां पित्रा
चतो॥२२॥ ॥ ॥इतिश्रीषड्विद्यागमे सांख्यायनतंत्रे द्विती
यः पटलः॥२॥ ॥ ॥ ॥क्रौंचभेदन उवाच॥ ॥पूजाधा
रण यंत्रञ्च सर्वमंत्रविशारद॥ अभिषेकविधिं तात्व
दमे करुणाकर॥१॥ श्रीईश्वर उवाच॥ ॥आश्विने
कार्त्तिके चैव चैत्रमासि कुमारक॥ कर्त्तव्यमभिषेकं
च माने वा सिद्धिकांक्षिणः॥२॥ गुरौ च वोच्चगा वितृवास
रे च कुमारक॥ मंत्राभिषेकं कर्त्तव्यं सततं सिद्धिकांक्षिणं॥३॥ ५
रोहिणी श्रवणे चैव स्वात्यां चैव विशाखयोः॥ मंत्राभिषेकः
कर्त्तव्यः सद्यः सिद्धिकरो भुवि॥४॥ एवं तु शुभदिने सम्यक्पू

र्वेद्धि सम्पोषितं॥ स्नापयेत्पंचगव्येन ततश्चामलकेन तु॥
॥५॥ ततः शिष्यं समानीय देवतासन्निधिं पुनः॥ अयुतं प्रज
पेन्मंत्रं गायत्रीं वेदमातरं॥६॥ दिवस्ये शाने नागे तु गोमय
न विलेपिते॥ रंगवल्या लिखेद्यंत्रं रक्तपीतसिताऽसितैः॥७॥
षोडशांगुलमानं तु लिखेद्विद्वान्मनन्यधीः॥ तस्योपरि लि
खेद्दलमष्टपत्रं सकेशरं॥८॥ प्रियंगुशालिगोधूमचण
काढकमाषकं॥ कुलिश मुद्गनीवारं क्रमान्मध्यादि विन्य
सेत्॥९॥ प्रस्थं चैव चतुर्विंशात्प्रत्येकं धान्यमेव च॥ अत्र
णं स्थूलकलशं मध्ये संस्थाप्य बुद्धिमान्॥१०॥ अष्टपत्रे
न्यसेत्सुत्र कलशाष्टकमादरात्॥ सौलितवासितं तु द्रक

लशं च समर्चयेत् ॥११॥ षोडशैरुपचारैश्च ध्रुवाद्यैर्नैव विन्य
सेत् ॥ आपोवानेन पूर्येत नदीजलमकल्मषं ॥१२॥ निक्षिप
न्नवभांडेषु नवरत्नान्कुमारक ॥ कस्तूरीचंदनोपेतं नवभां
डेषु निक्षिपेत् ॥१३॥ मध्ये देवीं समावाह्य चिन्मयीं बगला
म्बिकां ॥ प्राणस्थापनमार्गेण केवलोक्तविधानतः ॥१४॥ वा
णी चैव रमा गौरी शची स्वाहा रतिस्तथा ॥ दुर्गा छायां समभ्य
र्च्य पूर्वाद्यष्टकमीरितं ॥१५॥ अर्चयेत्पूर्ववत्पुत्र केवलो
क्तविधानतः ॥ नवीयं नवसंख्याकं वस्त्रेणैव च वेष्टयेत् ॥१६॥
स्रक्गंधपत्रपुष्पादि विन्यसेत्कलशांतरे ॥ तत्र शिष्यं समा
नीताकृत्विग्वरणमाचरेत् ॥१७॥ वेदवेदांगपारीणमष्टौ

ब्राह्मणमादरात् ॥ प्रार्थयेद्गुणसंयुक्तमर्चयेद्वस्त्रभूषणैः
॥१८॥ तान्कुंभादिषु मंत्रेण पूर्वकलशमार्जनं ॥ लक्ष्मीसूक्ते
न श्रीसूक्तैर्द्वितीयकुंभमार्जनं ॥१९॥ पौरुषेणैव सूक्तेन तृती
यं कलशं तथा ॥ नारायणानुवाके चतुर्थं कलशं तथा ॥२०॥ पं
च ब्रह्ममयैर्मंत्रैः पंचमं कलशं तथा ॥ षष्ठं चाजस्य पारे तु
ब्रह्मवल्ल्या तु सप्तमं ॥२१॥ अष्टमं कृग्वल्ल्येन मार्जयेन्मंत्रको
विदः ॥ मध्यस्थं पूर्णकलशं मूलमंत्रेण मार्जयेत् ॥२२॥ एवं
च मार्जनं कृत्वा नैवीय वस्त्रभूषणैः ॥ अलंकृत्वा गुरुं शिष्यमा
नीतां मंडपांतरे ॥२३॥ धामो रूपरिविन्यस्य मूर्ध्नि चाघ्राय
सादरात् ॥ एकैकं चैव पुरश्चर्यमूलमंत्रं कुमारक ॥२४॥ सद्दि

रण्योदकं पूर्वं दद्याच्छिष्याय पुत्रक ॥ स्वहस्तकमलमध्यस्कोवि
द्यो ज्योतिर्मयी पुनः ॥२५॥ शिष्यस्य हृदये चैव प्रविशन्तीति
भावयेत् ॥ तद्वच्छिष्यस्य संभाव्य गुरुर्यत्नेन तोषयेत् ॥२६॥
एवं मंत्राभिषेकं च कुर्याद्दृष्ट्वा स्वविद्यया ॥ सद्यः सिद्धिर्न
चेत्पुत्र पुरश्चर्यं विनानु वि ॥२७॥ ॥ ॥ इति श्री षड्विद्या
गमे सांख्यायन तंत्रे ईश्वर क्रौंचभेदन संवादे दीक्षाविधि
र्नाम तृतीयः पटलः ॥३॥ ॥ ॥ क्रौंचभेदन उवाच ॥
गंगाधर नमस्तेस्तु गौरीनाथ नमो नमः ॥ अस्यास्य मंत्रसं
ध्यां च वद मे करुणाकर ॥१॥ श्री ईश्वर उवाच ॥ ॥ मंत्रम
ध्यापयेत्तस्य शिष्यस्य गुरुरादरात् ॥ तदारभ्य तु तन्मंत्रे

मंत्रसंध्यां समाचरेत् ॥२॥ मंत्रसंध्यां प्रवक्ष्यामि शारदजन्मन
समासतः ॥ मंत्रसंध्याविहीनस्य सर्वं तन्निष्फलं भवेत् ॥३॥
पंचांगविधिना स्नात्वा मंत्रस्नानमनंतरं ॥ ततः स्नायादंग
मंत्रैर्मूलेनैव तु मार्जयेत् ॥४॥ धौतवस्त्रं परीधाय स्वगृह्यो
क्तविधानतः ॥ नित्यकर्म समाप्याथ मंत्रसंध्यां समाचरे
त् ॥५॥ अंकुशेनैव मुद्रया सूर्यमंडलगं जलं ॥ आनयेत्तो
यमध्ये तु ध्यानयोगेन बुद्धिमान् ॥६॥ आवाहनी स्थाप
नी च सन्निधापन्यतः परं ॥ सन्निरोधन मुद्रा च सन्मुखी
प्रार्थनी तथा ॥७॥ एवं मुद्राश्च तत्तोये दर्शयेत्साधकोत्तमः ॥
अंकुशेनाधयेत्तस्या दमन्तीकरणं पुनः ॥८॥ तज्जलं वाम

चुलके गृहीत्वास्याध्यकोत्तमः ॥ मूलेनैव त्रिधामंत्र्य अष्टपत्रां
बुजं लिखेत् ॥९॥ मध्ये चैकाक्षरीमंत्रं बगलानाम्नि पुत्रक ॥
वेदसंख्यामंत्रवर्णान्संप्रयत्नः क्रमाल्लिखेत् ॥१०॥ अंत्यपत्रे
चाष्टवर्णान् लिखेन्मूलमनुं तथा ॥ पुनरेकाक्षरं मंत्रं त्रि
सप्तमभिमंत्रयेत् ॥११॥ तेन मूलेन संमार्ज्य मार्जनक्रमतो
र्चक ॥ तन्मार्जनविधिं वक्ष्ये ऐहिकामुष्मिकेन च ॥१२॥ त्रिधा
मूर्ध्नि द्विधा बाह्वोस्त्रिधा हृन्नाभिदेशयोः ॥ द्विधा पादे च सं
मार्ज्य सौम्यकर्मेष्वयं क्रमः ॥१३॥ एवं च मार्जनं कृत्वा गायत्रीं ब
गलाकृतं ॥ अर्घ्यत्रयं च निक्षिप्य हृदि संभाव्य देवतां ॥१४॥ मू
लेन मंत्रितं तोयं त्रिवारं च त्रिधा पिबेत् ॥ एवमेव त्रिकालं

च मंत्रसंध्यां समाचरेत् ॥१५॥ उपस्थानं त्रिकालस्य वक्ष्येऽहं
क्रौंचभेदन ॥ उपस्थानं विना संध्या निष्फला नात्र संशयः ॥
॥१६॥ गंभीरां च मदोन्मत्तां स्वर्णकांतिसमप्रभां ॥ चतुर्भुजां त्रि
नयनां कमलासनसंस्थितां ॥१७॥ दक्षिणे मुद्गरं पाशं वामे जि
ह्वां च वज्रकं ॥ पीतांबरधरां सौम्यां दृढपीनपयोधरां ॥१८॥
हेमकुंडलभूषांगीं पीतचंद्रार्द्धशेखरां ॥ पीतभूषणभूषां
गीं स्वर्णसिंहासने स्थितां ॥१९॥ एवं ध्यात्वा तु देवेशीं प्रातःसं
ध्यां समाचरेत् ॥ मंत्रसंध्यां विना मंत्रं कोटिकोटि जपेन्न त
त् ॥२०॥ न भवेन्नोरिसिद्धाद्यैर्मंत्रसिद्धिः कुमारक ॥ त्रिकाल
माचरेत्संध्यामुपस्थानं तथैव च ॥२१॥ सहस्रं च जपेन्नित्यं

सिद्धिः षण्मासगो भवेत् ॥ पूर्वोक्तविधिवत्संध्यां कृत्वा चाष्टोत्त
रं जपेत् ॥ २२ ॥ यं यं वापि स्मरेन्पुत्र तं तमाप्नोति निश्चितं ॥ संध्या
मंत्रेषु सर्वेषु अंगमेव कुमारक ॥ २३ ॥ न प्रसिद्धं सांगहीनं त
स्मात्संध्यां समाचरेत् ॥ ॥ ॥ ॥ ॥ इति श्रीषड्विद्यागमे सां
ख्यायन तंत्रे ईश्वरकार्तिकेयसंवादे संध्याविधिर्नाम चतु
र्थः पटलः ॥ ४ ॥ ॥ ॥ क्रौंचभेदन उवाच ॥ ॥ नमस्ते स्तु
जगन्नाथ नमस्ते वृत्तिविग्रह ॥ एकाक्षरी महामंत्रं बगला
ख्यं महाप्रभो ॥ १ ॥ श्रीईश्वर उवाच ॥ ॥ तत्र देकाक्षरी मंत्रं १
तत्र मंत्रेषु जीवनं ॥ उत्तमं बीजयुक्तं च मंत्रं सर्वार्थसाधनं ॥
२ ॥ नानामंत्रेषु मंत्रं वा बीजाख्यं सर्वसिद्धिदं ॥ निर्बीजमेव

निर्वीर्यं शिवस्य वचनं यथा ॥ ३ ॥ तद्बीजोद्धारमनघं सर्वसि
द्धिप्रदायकं ॥ योजनं च प्रयोगं च वक्ष्येहं तव पुत्रक ॥ ४ ॥ सांत
वांत समायुक्तं चतुर्थस्वरसंयुतं ॥ रेफाक्रांतं बिंदुयुक्तं ब्रह्मा
स्त्रैकाक्षरी मनुः ॥ ५ ॥ ब्रह्मा ऋषिश्च छंदोयं गायत्री समुदा
हृतं ॥ देवता बगला नाम शक्तिश्चिन्मयरूपिणी ॥ ६ ॥ लं बीजं
ह्रीं च शक्तिः स्वरां कीलकमुदाहृतं ॥ न्यासं विद्यां प्रवक्ष्यामि
मंत्रसिद्धिकरं नृणां ॥ ७ ॥ भूतशुद्धिं भूतशुद्धिं च मातृकाद्वि
तयं न्यसेत् ॥ मंत्राक्षरेण विन्यस्य तद्विधिं शृणु पुत्रक ॥ ८ ॥
नेत्र घ्राण पुनः पंच नव पंचदशाक्षरं ॥ विन्यसेद्गुलात्रि
श्च षडंगेषु तथैव च ॥ ९ ॥ वक्ष्येहं पंजरन्यासं मंत्रसिद्धिकरं

न्नणां ॥ बगला पूर्वतो रक्षेदाग्नेयां च गदाधरी ॥१०॥ पीतांबरी
दक्षिणे च स्तंभिनी चैव नैर्ऋते ॥ जिह्वाकीलिन्यतो रक्षेत्प
श्चिमे सर्वदा मयि ॥११॥ वायव्ये च मदोन्मत्ता कौबेरे च त्रिशू
लिनी ॥ ब्रह्मास्त्रदेवता पातु पाताले स्तब्धमातृका ॥१२॥ ऊ
र्ध्वं रक्षेन्महादेवी जिह्वास्तंभनकारिणी ॥ एवं दश दिशो
रक्षेद्बगला सर्वसिद्धिदा ॥१३॥ एवं न्यासविधिं कृत्वा यत्किं
चिज्जपमाचरेत् ॥ तस्याः संस्मरणादेव शत्रूणां स्तंभनं भ
वेत् ॥१४॥ सर्वन्यासविधिं कृत्वा बगलामातृकां न्यसेत् ॥ १०
तन्मातृकाविधिं वक्ष्ये सारात्सारतरं तथा ॥१५॥ नारं च मातृ
कावर्णं बगलाबीजमेव च ॥ नमो तेन च विन्यस्य मातृका

स्थानगोऽनघ ॥१६॥ ध्यानेन मंत्रसिद्धिः स्याद्ध्यानं सर्वार्थसा
धनं ॥ ध्यानं विना न भवेन्मूको सिद्धमंत्रोपि पूजक ॥१७॥ वादी
मूकति रंकति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति म
दुर्जनः सुजनति क्षिप्रानुगः खंजति ॥ गर्वी खर्वति सर्ववि
च्च जडति त्वद्यंत्रिणा यंत्रितः श्रीविद्ये बगलामुखि प्रतिदि
नं कल्याणि तुभ्यं नमः ॥१८॥ एवं ध्यात्वा जपेन्मंत्रं तत्त्वसंख्यं
बुद्धिमान् ॥ गुडोदकेन संतर्प्य तद्दशांशं कुमारक ॥१९॥ त्रि
कोणकुंडे कुंडे या इष्टां निम्नोन्नते भुजे ॥ हयारिकुसुमैर्नै
व स्वरक्तेनाज्यसंयुत ॥२०॥ ब्राह्मणान्भोजयेत्पश्चात्तत्संख्या
तु युग्मकं ॥ मंत्रसिद्धिर्भवेत्तुत्र नान्यथा शिवभाषणं ॥२१॥

वाममार्गक्रमेणैव वामामभ्यर्च्य पुष्पिणीं ॥ मंत्रसिद्धिकरं चै-
व सर्वदा रिपुनाशनं ॥२२॥ परमंत्रप्रयोगेषु नानाचेटक-
कृत्रिमैः ॥ स द्युः स्तंभनं विद्याच वशगला चन संशयः ॥२३॥ ७
॥ ॥१०॥ इति श्रीषड्विद्यागमे साख्यायन तंत्रे ईश्वरक्रौंच-
भेदन संवादे एकाक्षर मंत्रोद्धासे नाम पंचमः पटलः ॥५॥
॥ ॥ ॥ ॥ क्रौंचभेदन उवाच ॥ नमस्ते योगिसंसेव्य
नमः कारुणिकोत्तम ॥ एकाक्षरी महामंत्र प्रयोगं वद शंक-
र ॥१॥ श्रीईश्वर उवाच ॥ उत्तमं कुंडहोमं च स्थंडिलं
चैव मध्यमं ॥ स्थंडिलेन विनाहोमं निष्फलं भवति ध्रुवं ॥२॥ ११
षट्कोणं चाष्टकोणं च चतुःकोणं कुमारक ॥ त्रिविधं स्थंडिलं

चैव वक्ष्येऽहं कर्मसादरं ॥३॥ लक्ष्मीशांतिस्तथा पुष्टिर्विद्या विघ्ननि-
वारणे ॥ चतुरस्रे कुंडे तंत्रविस्तरिशोधिते ॥४॥ वशीकरणसं-
मोहे वाणिज्ये द्रव्यसंग्रहे ॥ कीर्तिकाम स्तु जुहुयाद् भगाकार स्तु
कुंडके ॥५॥ दर्शौद्वियस्तंभनेषु दिव्ये गर्भे स्तथैव च ॥ त्रिकोण
कुंडे जुहुयाद् गुरुमार्गेण बुद्धिमान् ॥६॥ विद्वेषणेषु जुहुया
द्वर्तुलं कुंडमध्यगो ॥ उच्चाटणेषु जुहुयात्सद्धोणाख्ये चकुंडके
॥७॥ मारणे चाष्टकोणेषु तत्तत्कर्मानुसारतः ॥ तत्तद्द्रव्येण जुहु-
यात्तत्तद्धृशो क्रमेव च ॥८॥ वक्ष्येऽहं स्थंडिले होमं षट्कर्म सकु-
मारक ॥ जुहुयाच्छांतिवश्येषु स्थंडिले चतुरस्रके ॥९॥ विद्वे-
षणे स्तंभने च जुहुयादष्टकोणके ॥ मारणोच्चाटने पुत्रष

कोणेषु विधीयते ॥१०॥ प्रादेशमात्र होमे च आरत्नीक सहस्र
के ॥ हस्तं चायुत होमेषु द्विहस्तं लक्षहोमके ॥११॥ गुणहस्तं कोटि
होमे कुंडं निम्नोन्नतं स्मृतं ॥ स्थंडिलस्य च वक्ष्यामि तां त्रिकोणकं
च लक्षणं ॥१२॥ अरत्निहस्तमात्रं च द्वारत्निं च द्विहस्तके ॥ शतं स
हस्रमयुतं लक्षहोमेषु यत्क्रमः ॥१३॥ सर्वत्रैवोन्नतं पुत्र प्रादे
शं स्थंडिलं क्रमं ॥ लक्षणं स्थंडिले कुंडे नज्ञात्वा निष्फलं कृतं
॥१४॥ शांतिवश्यस्तंभनानि विद्वेषोच्चाटने ततः ॥ मारणांता १२
नि शंसंति षट्कर्माणि मनीषिणः ॥१५॥ नानारोगैः कृत्रिमै
८ श्च नानाचेष्टकैमेव च ॥ विषभूतप्रयोगेषु नीरसः शांतिमेव
च ॥१६॥ वश्यं जनानां सर्वेषां वोत्सन्यं हे द्रुतं स्मृतं ॥ स्तंभनं

रोधनं पुत्र सर्वकर्मस्मृ निश्चितं ॥१७॥ मैत्रस्य कलहोत्य त्रिवि
द्वेषणमुदाहृतं ॥ चलबुद्धिभ्रमेणोक्त उच्चाटनमिदं भुवि ॥
१८॥ प्राणिनां प्राणहरणं मारणं समुदाहृतं ॥ प्रत्येकमेषां व
क्ष्यामि होमयोगं स्मृ निश्चितं ॥१९॥ दूर्वा होमं त्रिमधुकं गुडु
च्यादयुतं त्रयं ॥ रोगकृत्यग्रहादिभ्यः सद्यः शांतिकरं भवेत् ॥
॥२०॥ शांमे त्रिकुसुमै राज्य पूतं वाणायुतं तथा ॥ गुडुचा निज्ञि
काले च वश्यं संमोहनं भवेत् ॥२१॥ बिजीतकस्यामिद्विवाक
रंजै वृक्षमेव वा ॥ नेत्रायुतं हुनेत्सुत्र स्तंभनं परमं मतं ॥२२॥
निंबार्कपत्रहोमेन निंबतैलै स्मृ मिश्रितं ॥ नेत्रायुतेन वि
द्वेषं भवेत्पाषाणयोरपि ॥२३॥ उलूककाकयोः पत्रैर्बाणा

युतमखंडधीः ॥ ऊं ऊं यान्नगन्नतोशत्रौ श्रौमेतञ्जादनं स्मृतं ॥
॥२४॥ तिलतैलेन संसिक्तं शाल्मलीकुसुमं तथा ॥ लक्ष्मेकेऽदु
नेद्वात्री प्रेतागतो प्रेतकाननैः ॥२५॥ नग्नं प्रेतमुखं त्रौमे प्रेतका
ष्ठे च बुद्धिमान् ॥ मर्कटस्य हृता श्रोवमारणेञ्जवति ध्रुवं ॥२६॥
॥२७॥ ॥ ॥ इति श्रीषड्विद्यागमे सांख्यायनतंत्रे षष्ठःप
टलः ॥६॥ ॥ ॥ क्रौंचभेदन उवाच ॥ महापातुप
ताक्रांत नमः पन्नगभूषण ॥ षट्त्रिंशदक्षरी विद्या बगला
याश्च मे वद ॥१॥ श्री ईश्वर उवाच ॥ मंत्रोद्धारं प्रवक्ष्या
मि पुरश्चरणलक्षणं ॥ प्रयोगं चैव संहारं सांगं वच्मि पुत्र
क ॥२॥ तारं च बगला बीजं बगला पदमुद्धरेत् ॥ मुखीति पद १३

मुच्चार्य सर्वशत्रूंस्ततो वदेत् ॥३॥ दुष्टानां पदमुच्चार्य वाचंमुख
पदं वदेत् ॥ स्तंभयेति पदं चोक्त्वा जिह्वां कीलयमुच्चरेत् ॥४॥ बु
वि द्धिं नाशं ततोच्चार्य नाशाय पदं वदेत् ॥ ह्रीं मायां ततोच्चार्य नोऽनाशयेति
प्रणवं च ततोच्चरेत् ॥५॥ वह्निजायां समुच्चार्य एवं मंत्रं समु
द्धरेत् ॥ षट्त्रिंशदक्षरं मंत्रं मंत्रराजमिदं शुवि ॥६॥ न्यासविधिं
प्रवक्ष्यामि सर्वसिद्धिकरं परं ॥ बगलामातृकाचादौ कामतं
त्रेय वाग्भवं ॥७॥ श्रीमाया मातृकां चैव बगलापंचकं न्यसेत्
लघुषोढां च विन्यस्य सर्वमंत्रेष्वयं क्रमः ॥८॥ ध्यानं यत्नात्
वक्ष्यामि ध्यानं सर्वार्थसिद्धिदं ॥ आदौ मध्ये तथा चांते ध्या
नं सर्वार्थसिद्धिदं ॥९॥ चतुर्भुजां त्रिनयनां कमलासनसं

स्थितां ॥ त्रिशूलं पानपात्रं च गदां जिह्वां च बिभ्रतीं ॥ १० ॥ बिंबो-
ष्ठीं कंबुकंठीं च सम पीन पयोधरां ॥ पीतांबरां मदाघूर्णां ध्या-
येद्ब्रह्मास्त्रदेवतां ॥ ११ ॥ नारदो ऋषिरेवात्र अनुष्टुप् छंद एव
च ॥ देवता बगलानाम स्तंभनाख्या च चिन्मयी ॥ १२ ॥ लं बीजं चै-
व ह्रीं शक्तिः रं कीलकमुदाहृतं ॥ शत्रूणां स्तंभनार्थं च जपेद्य-
विधिपूर्वकं ॥ १३ ॥ संकल्पपूर्वकं मंत्रं कौलाचारक्रमेण वै
पृथ्वीलक्षं जपेन्मंत्रं न्यास ध्यान समन्वितं ॥ १३ ॥ तर्पयेत्तद्दशां-
शं च हेतु संमिश्र वारिणा ॥ जुहुयाद्बिल्वकुसुमैस्तद्दशांशं वै
सुबुद्धिमान् ॥ १४ ॥ ब्राह्मणान्भोजयेत्पुत्र तद्दशांशं घृतप्लु-
तं ॥ तर्पणे तर्पयामीति स्वाहांतं होममाचरेत् ॥ १५ ॥ पूजां जे- १४

कालिकीं नित्यं जप तर्पणमेव च ॥ होमे ब्राह्मण भुक्तिश्च पुर-
चरणमुच्यते ॥ १६ ॥ पुरश्चर्यां विना मंत्रं न प्रसिध्यति भूतले
॥ एवं साधितमंत्रेण षट्प्रयोगान्समाचरेत् ॥ १७ ॥ शांत्यार्थं जु-
याच्छालि सक्तु राज्यसमन्वितं ॥ गुणायुतं चामलक प्रमाणं क्षौ-
चन्नेदन ॥ १८ ॥ वशीकरणकार्येषु बिल्वपत्रं घृतप्लुतं ॥ गुणा-
युतं हुनेद्धीमान्कुंडे पूर्वोक्त आदरात् ॥ १९ ॥ स्तंभनेषु हुनेद्धीमा-
न्नालकं घृतसंयुतं ॥ बदरीफलमात्रं तु गुणायुतमनन्यधीः
॥ २० ॥ विद्वेषणे तु जुहुयात्पत्रैर्निंबार्कसंभवैः ॥ रात्रौ वेदायु-
घ२ तं धीमान्सद्यो विद्वेषणं भवेत् ॥ २१ ॥ राजीलवणसंयुक्तं वाणा-
घउ युतमनन्यधीः ॥ सत्यमुच्चाटनं चापि ध्रुवकर्मादियोरपि ॥

॥२२॥ तिलतैलेन संयुक्तं माषहोमं गुणायुतं ॥ प्रेताग्नौ प्रेतका
ष्ठेच उड्डयात्प्रेतकानने ॥२३॥ सोमवारे निशायां नग्नो उड्डयात्प्रे
तउन्मुखं ॥ सद्यो मारणमाप्नोति मृत्युकं तु सदृशो पिवा ॥२४॥
॥७॥ ७॥ ॥इति श्रीषड्डियागमे सांख्यायनतंत्रे सप्तमः प
टलः ॥७॥ ७॥ ७॥ श्रीवज्रदन्त उवाच ॥ ॥नमः कौलागमा
चार्य वेदवेदांग सुशासन ॥ वेगलामंत्रराजस्य प्रयोगं वदतु
कर ॥१॥ ॥श्री ईश्वर उवाच ॥ ॥राजीवलवणमादाय मूलमं
त्रेण पुत्रक ॥ ग्रस्तं कृत्वा साध्यनामं उड्डयाद युगे निशि ॥२॥
नानारोगहरं चैव नानाभूतनिकृन्तनं ॥ नानाकृत्रिमनाशं
च भवेत्सत्यं न संशयः ॥३॥ हरिद्राखंड होमेन अयुतेन कुमार
क ॥ वशीकरणसंमोहं भवेच्छंकर भाषणे ॥४॥ तैलकेन द १५

ने द्वात्रौ नेत्रायुतमनन्यधीः ॥ नानाकोन्ननमार्गेषु सत्यमे
कं न संशयः ॥५॥ खरस्य रक्तमादाय ज्ञातिकर्मविरोधिनां ॥
निंबार्कपत्रमादाय प्रत्येकं नाम संलिखेत् ॥६॥ प्रेताग्नौ प्रेत द
काष्ठेन नग्नेच प्रेतादि उड्डयेत् ॥ ७ नेत्रे ग्रवने धीमान् अ
युताद्वेषकारकं ॥८॥ अनाथस्य चिताराज्ञो नाचुप्रति कृतिं
लिखेत् ॥ हृदये नाममालिख्य मारयेति ललाटके ॥
दह युग्मं लिखेद्द्वौ ऊर्वौ भस्मीकुरु द्वयं ॥ ९ वं च विलिखे
त्सम्यक्स्पष्टतो वर्णमादरात् ॥१०॥ ताडयेद्धृदयामंत्री चाग
मे ष्टोत्तरं जपन् ॥ तद्भस्मं संग्रहेद्धीमान्गोपयेन्न गराद्बहिः
॥१०॥ पुनर्जोमनिशाकाले मंत्रयेन्मूलमंत्रतः ॥ अष्टोत्तर

सहस्रं च शत्रुमूर्ध्नि विनिक्षिपेत् ॥११॥ सशत्रुः सप्तरात्रेण
म्रियते नात्र संशयः ॥ उष्ट्रारूढ रिपुं ध्यात्वा गृहे यंत्रं तेन मं
त्रयेत् ॥१२॥ निक्षिपेत्सप्तरात्रे तु सप्तधा मंत्रितं त्रिधा ॥ नू
च्चाटनं भवेच्छीघ्रं शिवस्य वचनं यथा ॥१३॥ प्रणवं स्मनवी
आह्वं बगला मंत्रराजया ॥ सहस्रं मंत्रयेद्रात्रौ रात्रौ नुग्रे
न भौमके ॥१४॥ खाने पाने च तद्भस्म दातव्यं शत्रुमंडले ॥ वा
क्पाणि पादपायुश्च श्रोत्रं नेत्रं मतिस्तथा ॥१५॥ स्तंभनं च भ
वेच्छीघ्रं बृहस्पतिसमोपि वा ॥ किं पुनर्मानवादीनां स्कगमं
क्रौंचभेदन ॥१६॥ स्कंद प्रयोजनैः पुत्र न कर्तव्यं कदाचन ॥
अज्ञानात्कुरुते यस्तु देवताशापमाप्नुयात् ॥१७॥ प्रसौ कृता

वैरिनामं विलिखेत्ताडपत्रके ॥ निशाकाले चार्कवारे निर्द
द्दीपवह्निना ॥१८॥ कुबेरसदृशः श्रीमान्मासमात्रेण पुत्रके ॥
मंदबुद्धिर्दरिद्रोपि जायते नु विनिश्चयं ॥१९॥ चितिवस्त्रं न
वौ ग्राह्यं तदंगारं नवौ पुनः ॥ चितिकाष्ठं नवौ ग्राह्यं नवौ कुर्या
त्स ल्लेखिनीं ॥२०॥ नवौ रात्रौ च संलिख्य रिपोर्नाम च तत्पटे ॥
वेष्टयेद्बगलाबीजं मूलमंत्रं ततो परि ॥२१॥ वह्निबीजेन सं
वेष्ट्य वेष्टयेज्जीवनाम नुः ॥ गद्धस्त्रं गुलिकीकृत्वा वेष्टयेत्सग
रज्जुना ॥२२॥ स्थापयेच्चक्रवाटेषु निशि भौमेन वा चिते ॥ प्रा
देशागर्ते कृत्वा तु श्मशाने च सुबुद्धिमान् ॥२३॥ रवौ रात्रौ
च निक्षिप्य पूजयेद्भस्ममादरात् ॥ तत्र नग्नो जपं कुर्या

दयुतं मूलविधया ॥२४॥ मंदाग्निर्मंदबुद्धिश्च नेत्रश्रोत्रे चमं
दता ॥ पाणिपादौ च मंदत्वं निर्वीर्यो जायते ध्रुवं ॥२५॥ एवं रो
गसमायुक्तो मंडलाद्विपुनात्रानं ॥ चंद्रप्रस्तारमंत्रेण द्रुव्यत
र्पणमाचरेत् ॥२६॥ त्रागेस हस्तमयुतं कोद्धुं लाघवगौयवा
त् ॥ तत्तर्पणास्सवं पीत्वा प्रयोगं शांतिमाप्नुयात् ॥२७॥ मुमुक्षु
भिर्न कर्त्तव्या परपीडा कदाचन ॥ प्राणैः कंठगतैः कुर्यात्स्वश्रा
त्मरक्षामाचरेत् ॥२८॥ ॥७४॥ ॥ इति श्रीषड्विद्यागमे सां
ख्यायनतंत्रे ईश्वरक्रौंचभेदनसंवादे मंत्रराजप्रयोगो ना १७
म अष्टमः पटलः ॥ ॥७॥ ॥७॥ ॥ क्रौंचभेदन उवाच ॥ ॥
नमो रुद्रमंत्रागमकोविदाय श्रीनीलकंठाय नमो नमस्ते ॥

एतन्मनोर्यंत्रमखंडतेज प्रयोगमूलं वद चंद्रचूड ॥१॥ ॥ श्री
ईश्वर उवाच ॥ ॥ मंत्रप्रयोगं यमन्त्रास्सनेक लौ यंत्रप्रयोग
यमिनां च दुर्लभं ॥ यंत्रप्रयोगं यतयस्तु कुर्वंति यज्ञादिगो वि
प्रयतेश्वरक्षणे ॥२॥ बिंदुत्रिकोणवृत्तं च अष्टकोणं तदो परि ॥
तदोपरि लिखेत्सुत्र षट्कोणं वृत्तमादरात् ॥३॥ तदो परि लिखे
तू त्सम्यग्भूपुरं चैवमादरात् ॥ बिंदुमध्ये लिखेद्बीजं बगलायाश्च
पुत्रक ॥४॥ साध्यं तद्बीजगर्भस्थं कुर्यात्सम्यक्सुबुद्धिमान् ॥
तद्बीजं तु लिखेत्कोणत्रितये षु त्रिधा त्रिधा ॥५॥ अष्टपत्रेषु
विलिखेद्गायत्रीं बगलाह्वयां ॥ षट्कोणेषु न्यसं लिख्य विद्यां
द्विन्नादक्षरीं ॥६॥ वृत्ते च विलिखेत्पुत्र पंचाशद्वर्णमादरा

तं ॥ भूपुरे षु च संलिख्य प्राणस्थापनगं मनुः ॥७॥ रजते स्वर्ण
पट्टे वा प्रादेशे चतुरस्रके ॥ लेखिन्या स्वर्णमय्या च लिखेद्भा
र्गववासरे ॥८॥ पूजायंत्रमिमं पुत्र पूजनात्सर्वसिद्धिदं ॥ तत्पू
जनविधिं वक्ष्ये मुनिगुह्यं सुपावनं ॥९॥ मूलमंत्रेण संपूज्य
उपचारैश्च षोडशैः ॥ त्रुडुप्रदेशजा दूर्वा निर्मलाश्च सुकोम
लाः ॥१०॥ संगृह्य क्षालयेत्सम्यक् मंत्रराजेन पुत्रक ॥ मंत्रांते चर्म
नैः पूर्वं निक्षिपेद्दूर्वामादरात् ॥११॥ एवं भूतसहस्रं च पूजयेद्य
दिने दिने ॥ मंडलाद्याद्यायः सर्वे मुच्यंते कृत्रिमादयः ॥१२॥ भू १८
तप्रेतपिशाचाद्याः क्रूराः खेचरभूचराः ॥ पूजायां नाशमा
यांति शिवस्य वचनं यथा ॥१३॥ अर्चयेत्सूर्यवद्यंत्रमुपचा
रैः षोडशैः ॥ संग्रहेद्द्रुक्कुसुमं हयारेश्च सुनिर्मलं ॥१४॥

तेन पूजा प्रकर्तव्या पूर्ववन्मंडलं सुधीः ॥ संमोहनं च वश्यं च
द्रव्यलाभं च वेध्रुवं ॥१५॥ विजीतकोद्भवं पुष्पमानयेद्भौमवा
सरे ॥ पूजयेत्पूर्ववत्पुत्र नानारक्तजनकर्मणि ॥१६॥ निंबा
र्ककुसुमं वाथ पत्रं वाथ कुमारक ॥ पूर्ववत्पूजयेन्मंत्रैः स
द्यो विद्वेषणं भवेत् ॥१७॥ धुत्तूरकुसुमेनैव पूर्ववत्पूजये
त्सुत ॥ उच्चाटनं भवेत्सत्यं नान्यथा शिवभाषणं ॥१८॥ वि
षतिंदुकपुष्पेण पूर्ववत्सम्यगर्चयेत् ॥ स चोन्मादानमाप्नो
ति म्लेच्छसदृशो रिपुः ॥१९॥ नयामंगकुसुमेनैव पूर्ववत्पूजयेन्न
रः ॥ पुत्रवान्जायते लोके वेदशास्त्रार्थकोविदः ॥२०॥ पालाश
कुसुमेनैव पूजयेत्सूर्यवन्नरः ॥ सद्यो मंदो भवेद्वाग्मी लभे

त्सर्वदृतां स्कन॥२१॥ पूर्ववत्पूजयेत्तत्र अशोककुसुमेन च॥
दीप्तितां चलभे कन्या सा तु पुत्रवती भवेत्॥२२॥ तुलसीमंज
रीभिश्च पूर्ववत्पूजयेन्नरः॥ ज्ञानं न किंचवै राज्यं लभते चा
परैरपि॥२३॥ नैद्यावर्त्तेन संपूज्य वातरोगं व्यपोहति॥ मल्लि
का कुसुमेनैव पूजये ज्वरशांतये॥२४॥ कुसुमैश्चंपकैरर्चा
द्धीत ज्वरनिवारणं॥ अर्चयेज्जातिकुसुमैर्महारोगं विन
श्यति॥२५॥ वन्ध्यैश्च मल्लिकापुष्पैर्निक्षेपं लभते ध्रुवं॥ केत
कीकुसुमेनार्च्य धनवान् जायते ध्रुवं॥२६॥ एवं च पूजये
द्यंत्रं न जपैर्न च होमकैः॥ प्रयोगसिद्धिर्भवति बगलायाः १९
प्रसादतः॥२७॥ ॥७॥ ॥इति श्रीषड्विद्यागमे सांयनतंत्रे नव ख्या

३८

मः पटलः॥९॥ ॥७४॥ ॥क्रौंचभेदन उवाच॥ ॥अष्टमूर्त्तिर्म
हामूर्त्ते नमस्ते चंद्रशेखर॥ वद प्रयोगं मंत्रस्य लेपनं क्रममा
दरात्॥१॥ श्रीईश्वर उवाच॥ ॥पूर्वोक्तं यंत्रमालिख्य प्राण
स्थापनपूर्वकं॥ अर्चयेदुपचारेण चंदनेन विलेपयेत्॥२॥
बाणायुतं जपेद्धीमान्नित्यं पूजासमन्वितं॥ राज्यसिद्धिर्भ
वेत्सत्यं मयत्नेन कुमारक॥३॥ कस्तूरीलेपनं कुर्यात्सम्य
गर्चितयंत्रके॥ नित्यं बाणसहस्रं च न्यासध्यानसमन्वि
तं॥४॥ मंडलद्वययोगेन रोगहृत्यग्रहादयः॥ तत्क्षणान्ना
शमायांति तमः सूर्योदये यथा॥५॥ प्रतिंचाईपलै नित्यं
लेपयेद्यंत्रमादरात्॥ जपं कुर्यात्पूर्ववच्च मासैवामंडले

३९

तुवा ॥६॥ वशीकरणसंमोहनद्व्यसंग्रहमेवच ॥ भवत्येवन
संदेहो नात्र कार्या विचारणा ॥७॥ हरिद्रा तालकं चैव अर्क
क्षीरेण मर्दितं ॥ त्रिकालं लेपयेन्नित्यं त्रिसहस्रं जपेत्सुधीः
॥८॥ पञ्चस्तंभनमाप्नोति कुर्णाक्षिर्वा कम्पते रुकवा ॥ मंदु
लोंनगरेग्राममेरणसंमोहमेवुच ॥९॥ सर्षपात्रिकटुश्चै
व दुग्धवस्त्रार्कसंभवैः ॥ खलचेनमुर्दयेत्सम्यग्यत्रे लेप
नमाचरेत् ॥१०॥ कृत्वाथो मंडलं चैव षट्सहस्रं जपेद्दि
ने ॥ विद्वेषणं भवेच्छीघ्रं शिवस्य वचनं यथा ॥११॥ धुत्तू
र तिंदुकबीजं तालकेन समन्वितं ॥ निंबपत्र द्रवेणैव म
र्दयेल्लेपयेत्त्रिधा ॥१२॥ एवं मासप्रयोगेण नगरे ग्राम २०

मेवच ॥ रणं च राजगेहं वा स्त्रीप्रमुखाटनं भवेत् ॥१३॥ प्रेता
न्नं प्रेतजस्नं च प्रेतांगारं समं समं ॥ अर्कवज्रमयं क्षीरं स्व
र्पेणैवतु मर्दयेत् ॥१४॥ त्रिकालं लेपनं कुर्यात्संतपेद्दीपय
ष्टिना ॥ नित्यं कृत्वा सहस्रं च मंत्रराजमिमं जपेत् ॥१५॥ प
क्षान्मारणमाप्नोति नात्र कार्या विचारणा ॥ अथवा निंब
तैलेन तद्वत्कृत्वा तु मारणं ॥१६॥ तिलतैलेन संयुक्तं मर्दयि
त्वा मादरात् ॥ यंत्रस्य लेपनं कुर्यात्त्रिकालं मूलविद्यया
॥१७॥ तस्से पेद्दीपशिखया पक्षमेकं कुमारकं ॥ मारणं च
भवेत्सत्यं नात्र कार्या विचारणा ॥१८॥ वज्रक्षीरं त्रिकाले
तु पूर्ववल्लेपनेन च ॥ ता पज्वरेण पीडास्यात्स पमासाद्रि

पुमारणं ॥१९॥ पूर्ववल्लेपनं चैव जपसंतर्पणं तथा ॥ त्रिसप्त
दिनमात्रेण मारणं चौरवैरिणः ॥२०॥ धुत्तूरद्रवसंयुक्तेन
मर्दयेत्सर्षपं तथा ॥ उपलेपनयोगः पुत्र गुल्मरोगी भवेद्रिपुः
॥२१॥ निंबपत्रद्रवं चैव विषकंटकजं तथा ॥ विषतिंदुक
जं चैव त्रिविधं च समं समं ॥२२॥ त्रिकाललेपनं कृत्वा ष
ट्सहस्रं मनुं जपेत् ॥ पक्षाद्वा द्वादशाहेन मारणं चैन
संशयः ॥२३॥ मर्दयेदारनालेन मरीचं त्रिफलं तथा ॥ गुडू४
त्रिकाले लेपनं कुर्यात्त्रिकाले जपमाचरेत् ॥२४॥ करपा २१
ददहेनैव मंडलाच्छत्रुमारणं ॥ गोमये लेपनं तद्वद्गुल्म
रोगी भवेद्रिपुः ॥२५॥ गोमूत्रं छागमूत्रं च मिश्रितं पूर्व

वत्तथा ॥ पैत्यरोगी भवेच्छत्रुरधो मंडलमात्रतः ॥२६॥
लेपनं छागरक्तेन भ्रांतचित्तो भवेद्ध्रुवं ॥ मत्कुणस्य
च रक्तेन गुल्मादिर्जायते रिपुः ॥२७॥ ॥७॥ इति श्री
षड्विद्यागमे सांख्यायनतंत्रे ईश्वरस्कंदसंवादे य
त्रलेपनप्रकारो नाम दशमः पटलः ॥ ॥१०॥ ॥७॥ क्रौं
चभेदन उवाच ॥ ॥ नमस्तो मुनिसंसेव्य नमः पन्न
गभूषण ॥ तर्पणेन प्रयोगं च वद मे करुणाकर ॥१॥ श्री
ईश्वर उवाच ॥ ॥ पूजयेद्यंत्रराजं च उपचारैश्च षोडशैः
तद्यंत्रोपरि संतर्प्य तत्तर्पणविधिं शृणु ॥२॥ गुडोदकेन स्नाप
नं च कुर्यात्त्रिचायुतं तथा ॥ शांतिरुत्पद्यते शीघ्रं नात्र कार्या

विचारणा ॥३॥ द्रव्येण तर्पणं कुर्यात्सर्वसंख्यासु बुद्धिमा
न् ॥ वश्यं संमोहनं चैव भवेत्तर्पणयोगतः ॥४॥ मोहिनीद्र
व्यसंमिश्रं जलेनैव तु तर्पणं ॥ नेत्रायुतप्रमाणेन जिह्वास्तं
भनमाप्नुयात् ॥५॥ गतिगर्भं च वाग्वाणी गात्रस्तोत्रं तथा
बकं ॥ बुद्धिर्नूर्णा च निद्रा च स्तंभनं च भवेद्ध्रुवं ॥६॥ नि
र्वार्कपत्रद्रव्यैश्च मिश्रितं कूपवारिणा ॥ पंचायुतं तर्पणेन
सद्यो विद्वेषणं भवेत् ॥७॥ वज्रार्कक्षीरमिश्रं च क्षीरं भस्म त
र्पणेन च ॥ उच्चाटनं भवेच्छत्रोरयुतत्रयमादरात् ॥८॥ पि
तान्नं प्रेतभस्मं च प्रेतांगारं चपुत्रकं ॥ समं समं गरं चैव ज २२
लेनैव तु मिश्रितं ॥९॥ निशायुतं तर्पणेन पक्षाद्रिपुविना

शनं ॥ हयारिपत्रजद्रावैर्मिश्रितं मारणं भवेत् ॥१०॥ कर्पू
रमिश्रितेतोयैः पंचाशच्छतमादरात् ॥ नित्यं च तर्पयेद्धीमा
न्मासमेकमतंद्रितः ॥११॥ पुराणज्वरमत्युग्रं पैत्यरोगं विन
श्यति ॥ चंदनाभस्ततर्पणेन तापं कुष्टिमजं हरेत् ॥१२॥ कस्तू
रीमिश्रितैस्तोयै राज्यलाभो भवेद्ध्रुवं ॥ गोदुग्ध द्रव्यं तर्प्पणेन
द्रव्यलाभो भवेद्ध्रुवं ॥१३॥ पश्चात्तर्प्पणमंत्रेषु संयुतं ऋषि
संश्रयात् ॥ कुबेरस्य हृदंत्रं श्रीमान् जायते नात्र संशयः ॥
१४॥ माध्वीद्रव्येण संमिश्रं पूजिते त्र्यु डुवारिणा ॥ तत्वायु
तं तर्प्पणेन लक्ष्मीवान् जायते ध्रुवं ॥१५॥ गोक्षीरतर्पणेनैव
ईप्सितं सिद्धिमाप्नुयात् ॥ तक्रेण तर्प्पणं चैव पैत्यरोगं व्य

पोहति ॥१६॥ आरनालेन संतर्प्य जलदोषं च शाम्यति ॥ हरि
द्रांभेन संतर्प्पणेन स्त्रीणामाकर्षणं भवेत् ॥१७॥ श्यामेन कुंकुमे
नैव वासितं जलतर्प्पणं ॥ पुत्रवान् जायते मर्त्यो युते नार्व्य न
संशयः ॥१८॥ रंभाफलं च गोक्षीरं शर्करा च समं समं ॥ पला
ष्टकं च प्रत्येकं मिश्रितं जलतर्पणं ॥१९॥ मंत्रसिद्धिर्ज्ञानसि
द्धिर्भक्तिर्वैराग्यमेव च ॥ भ्रममज्ञानं व्यपोहेत नान्यथा शिव
भाषणं ॥२०॥ छागरक्तेन संमिश्रं च चिंतिजलतर्पणात् ॥ मूक
त्वं कुरुते पक्षाद्रिपुसंघाननेकशः ॥२२॥ जलेन मिश्रितं पुत्र
शोणितं विदुराहजं ॥ चिदायुतं तर्प्पणेन उन्मादी जायते रिपुः २३
॥२३॥ काकरक्तेन संमिश्रं तर्प्पणं तु द्रवारिणा ॥ जातिभ्रष्टो

भवेच्छत्रुः सज्जनैर्निंदितो भवेत् ॥२४॥ उलूकरक्तसंमिश्रं वारि
णा तर्प्पणं तथा ॥ नेत्रायुतं भवेच्छत्रुर्नेत्रहीनो न संशयः ॥२५॥
खरक्तेन च संमिश्रं वारिणा तर्प्पणं तथा ॥ व्रणेन म्रियते श
त्रुरयुतद्वययोगतः ॥२६॥ श्वानरक्तेन संमिश्रं वारिणा तर्प्प
णं तथा ॥ श्वानवत्कल्पते शत्रुर्म्रियते चायुतत्रये ॥२७॥ मार्जा
लरक्तसंमिश्रं तर्पणं वारिणा तथा ॥ क्षयरोगी भवेच्छत्रुः षण्मा
सान्म्रियते रिपुः ॥२८॥ जपसंख्या यत्र नोक्ता भवेत्पंचायुतं स
ति ॥ दिनसंख्या यत्र नोक्ता पक्ष एव न संशयः ॥२९॥ ॥ ॥
॥ ॥ इति श्रीषड्विद्यागमे सांख्यायनतंत्रे ईश्वरस्कंदसं
वादे यंत्रोपरि तर्पणप्रयोगो नाम एकादशः पटलः ॥ ॥११॥

॥ ३ ॥ क्रौंचभेदन उवाच ॥ नमस्ते शर्व सर्वेन्द्र नागविनासु
रञ्जन ॥ गायत्रीबगलाख्यां च वद मे करुणाकर ॥ १ ॥ श्री
ईश्वर उवाच ॥ मंत्रोद्धारं प्रवक्ष्यामि मंत्रमाहात्म्यमेव च
॥ पुरश्चर्याप्रयोगं च वक्ष्येऽहं तव पुत्रक ॥ २ ॥ ब्रह्मास्त्राय प
दं चोक्त्वा विद्महे ति ततः परं ॥ स्तंभने ति पदं चोक्त्वा बाणाय
तदनंतरं ॥ ३ ॥ धीमहीति पदं चोक्त्वा तन्नः शक्तिं ततो वदे
त् ॥ बगलापदमुच्चार्य उद्धरेच्च प्रचोदयात् ॥ ४ ॥ गायत्री
बगलानाम्नी चिन्मयी शक्तिरूपिणी ॥ सर्वसिद्धिं प्रदाप
येत् ॥ ब्रह्मा ऋषिश्च छंदोऽपं गायत्री समुदाहृतं ॥ ५ ॥ देवता
बगलनाम्नी ॥ ॐ बीजं शक्ति ह्रीं चैव कीलकं चिद्यहे पदं

॥ ६ ॥ चतुर्लक्षं पुरश्चर्या तद्दशांशं च तर्पणं ॥ हवनं तद्दशांशे
न तावद्ब्राह्मणभोजनं ॥ ७ ॥ न्यासध्यानादिकं सर्वं कुर्यात्त
न्मंत्रराजवत् ॥ प्रयोगानथ वक्ष्यामि गायत्रीबगलाह्वये
॥ ८ ॥ तारादिकं जपेन्मंत्रं स्त्री साध्यं च कुमारक ॥ शान्त्यर्थं
प्रजपेत्पुत्र नारसिंहपूर्वकं ॥ ९ ॥ संमोहनार्थं प्रजपेत्का
मराजपुरःसरं ॥ स्तंभनार्थं जपेत्पुत्र बगलाबीज पूर्व
कं ॥ १० ॥ विद्वेषणार्थं प्रजपेत् हुंकारहृदयपूर्वकं ॥ उच्चाटने
जपेत्पुत्र शक्तिवाराहपूर्वकं ॥ ११ ॥ वाराहशक्तिवाराहस्त
म्भमाया पुरःसरं ॥ प्रजपेन्मंत्रमेतद्धि मारणं भवति ध्रु
वं ॥ १२ ॥ वाग्भवादि जपेन्मंत्रं विद्यासिद्धिर्भविष्यति ॥ बा

लादिप्रजपेन्मंत्रं कन्याकांक्षितमाप्नुयात् ॥१३॥ वाराहबीज
मध्यस्थं गायत्रीं लक्ष्मीमाप्नुयात् ॥ धूलाभोजायते तस्य अ
नायासेन पुत्रक ॥१४॥ श्रीबीजादि जपेत्पुत्र गायत्रीं बगला
हृदयं ॥ कुबेरसदृशः श्रीमान्जायते नात्र संशयः ॥१५॥ ता
र्क्ष्यबीजादि मंत्रं च प्रजपेद्ध्यानपूर्वकं ॥ नानाविषप्रयोगं च
गज्वररोगादिनाशनं ॥१६॥ भैरवं बीजमाद्यं च प्रजपेच्च कुमा
रक ॥ भूतप्रेतपिशाचाद्यास्तत्प्रयोगाद्द्रुपो हति ॥१७॥ जपे
दस्त्रग बीजादि गायत्रीं बगला हृदयं ॥ गोपज्वरं महानागपंचा
मये ल्कौंच भेदन ॥१८॥ जपेच्च वायुबीजादि गायत्रीं बग
ला हृदयं ॥ राजो वा राजपुत्रो वा मरणांतं वशी भवेत् ॥१९॥ २५

महामायादि गायत्रीं प्रजपेद्वगलाहृदयं ॥ क्षिप्रमुच्चाटनं चै
व भवेच्छंकरभाषणं ॥२०॥ अग्निबीजादि गायत्रीं प्रजपे
द्वगलाहृदयं ॥ महतातापसंयुक्तः पश्चाच्छत्रुर्मृतो भवेत् ॥
२१॥ मायादि प्रजपेत्पुत्र गायत्रीं बगलाहृदयं ॥ राजो वा रा
जपुत्रो वा मरणांतं वशो भवेत् ॥२२॥ मुहामायादि गाय
त्रीं प्रजपेद्वगलाहृदयं ॥ वस्त्रसिद्धिर्भवेत्क्षिप्रं त्रिवस्य
च्चंदनं यथा ॥२३॥ मंत्रराजस्य गायत्रीं पादौ द्व्यं च यथा तथा
॥ गायत्रीं च विना मंत्रं न सिध्यति न संशयः ॥२४॥ पुरश्च
रणकालेषु गायत्रीं प्रजपेन्नरः ॥ मूलविद्यादशांशं तं च मं
त्रसिद्धिर्भवेद्ध्रुवं ॥२५॥ त्यक्त्वा तन्मंत्र गायत्रीं यो जपेन्मं

क्रमादुत्तरात् ॥ कोटिकोटिजपेनैव तस्य सिद्धिर्न जायते ॥२६॥
जपसंख्या यत्र नोक्ता लक्षमेकं कुमारक ॥ दिनसंख्या यत्र
नोक्ता पक्षमेकेन संशयः ॥२७॥ गायत्रं बगलानाम्नी बग
लायाश्च जीवनं ॥ मंत्रादौ चाद्यमंत्रांते जपेद् ज्ञानपूर्वकः सुर ॥
॥२८॥ ॥ ॥ ॥ इति श्रीषडाम्नायागमे सांख्यायनतंत्रे ईश्वर
क्रौंचभेदनसंवादे बगलाख्या विद्यागायत्री मंत्रोद्धा
र तत्प्रयोगो नाम द्वादशः पटलः ॥ ॥१२॥ ॥ ॥ क्रौंचभेद
न उवाच ॥ ॥ श्रीखंड श्रीधराधार त्रैलोक्यवर भूषण ॥
सांप्रतं वद देवेश पूजां बगलायाश्च शंकर ॥१॥ श्री ईश्वर उ
वाच ॥ ॥ बिंदुमध्ये च संपूज्य स्वर्णसिंहासनोपरि ॥ चिन्म २६

यीं बगलां देवीं सर्वसिद्धिप्रदायिकां ॥२॥ चतुर्भुजां वा द्विभुजां ग
दां जिह्वां च बिभ्रतीं ॥ पीतवर्णां मदापूर्णां ध्यायेन्मूलविद्यया
॥३॥ त्रिकोणे पूजयेत्पुत्र वाणीं गौरीं रमां क्रमात् ॥ तत्र ह्रीजेन
संपूज्य तत्र ह्राह्रेन पूर्वके ॥४॥ पंचास्त्रं पंचकोणेषु वस्येत्तत्पूजनं
क्रमात् ॥ पूर्वकोणेषु संपूज्य अस्त्रं च बगलामुखीं ॥५॥ द्वितीयको
णे संपूज्य अस्त्रराजं कुमारक ॥ उल्कामुखीति विख्यातां तन्मंत्रे
णैव पूजयेत् ॥६॥ तृतीयकोणे संपूज्य अस्त्रराजं कुमारक ॥ ना
म्नी ज्वालामुखी चैव तत्तन्मंत्रेण पूजयेत् ॥७॥ चतुर्थकोणे संपू
ज्य अस्त्रराजं कुमारक ॥ जातवेदमुखीनाम्नी तन्मंत्रेणैव पूजये
त् ॥८॥ पंचमेषु च कोणेषु अस्त्रराजं कुमारक ॥ बृहद्भानुमुखी

ख्यातं त्रिषु लोकेषु दुर्लभं ॥९॥ पंचकोणेषु देवमेवं पंचास्त्रं समभ्य
र्चयेत् ॥ मूलमंत्रेण तेनैव पूजायंत्रे कुमारके ॥१०॥ तस्योपरि स
मभ्यर्च्य दिक्पालाष्टकमादरात् ॥ तद्बाह्ये नवं च तत्र क्षि तदायुधपु
रःसरं ॥११॥ तस्योपरि समभ्यर्च्य मातृकाष्टकमेव च ॥ तस्योपरि
समभ्यर्च्य विघ्नेशाष्टकमेव च ॥१२॥ तस्योपरि समभ्यर्च्य भैर
वाष्टकमेव च ॥ पूजायंत्रं क्रमस्त्वेषु एवमेव कुमारके ॥१३॥ सालग्रा
मशिलायां वा वह्निमंडलमध्यगे ॥ कन्यायां वाथवा पुत्रे पूजये
द्बगलांबिकां ॥१४॥ उत्तमा युवती पूज्या मध्यमा वह्निमंडले ॥ अ
धमा च शिलापूजा क्रम एषु शिवोदितः ॥१५॥ नमो तेनैव संपू
ज्य पूजेषा च कुमारके ॥ एवं च पूजयेत्सम्यक्पुरश्चरणकेपि २७

चौ ॥१६॥ द्रव्यं च त्रिविधं प्रोक्तं पूजायाश्च विशेषतः ॥ गौडी मा
ध्वी च पैष्टी च गौडी देवो नमो नमः ॥१७॥ छागकुक्कुटमत्स्याश्च
बगलाप्रीतिकारणं ॥ त्रिकालं पूजयेद्देवि त्रिकालं प्रजपेन्मनुं
॥१८॥ तस्य दर्शनमात्रेण पंडितानां च वाग्मिनां ॥ तेषां प्रज्ञा प्र
लायेत तमः सूर्योदये यथा ॥१९॥ तेजो जेदमनेकं च सर्वं यात्रौ
कुमारके ॥ चंद्रो यद्वत्स्रविद्यंति तद्वद्वाग्रूपचातुरी ॥२०॥ बग
लामंत्रसिद्धस्य हृदये च प्रविशंति ॥ प्रतिवादी भवेन्मूको वाचो
हस्पतिसमोपि वा ॥२१॥ प्रज्ञाकर्षणमाक्रम्य बगलां भूत
ले स्मरेत् ॥ विद्यामाकर्षणार्थं च सद्य एव न संशयः ॥२२॥ उ
लुघ्य बगलामंत्रं उपासकमनस्य धीः ॥ यत्किंचित्तु तेक

र्म पश्चि बीजमिवांकुरैः ॥२३॥ ब्रह्मचारी वनप्रस्थो गृहीत्वैवाथ
वा यतिः ॥ बगलामंत्रसिद्धस्तु सैव पूज्यो मुनीश्वरैः ॥२४॥ बगला
मंत्रसिद्धं च यत्र तिष्ठति भूतले ॥ पंचक्रोश प्रमाणे च विद्या
न्यानैव न भासते ॥२५॥ न भासते चान्य विद्या न स्फुरंत्यन्य
से मुषी ॥ प्रयोगं चैव न भवेद्बगलाद्यां परैः पुरा ॥२६॥ ग्रस
नी सर्व विद्यानां बगलैका च भूतले ॥ बगलां या विना मंत्र
त्रिषु लोकेषु दुर्लभं ॥२७॥ सत्संप्रदाय विधिना साधयेद्बग
ला मुखी ॥ एवं च बगला मंत्रं मंत्रराजमिमं भुवि ॥२८॥ ॥
॥ ॥ ॥ इति श्री षड्विद्यागमे सांख्यायन तंत्रे ईश्वर क्रौं २८
च भेदन संवादे ब्रह्मास्त्र यंत्र पूजा प्रकारो नाम त्रयोदशः

पटलः ॥ ॥१३॥ ॥ ॥ क्रौंच भेदन उवाच ॥ ॥ चिद्विद्या
प विश्वेशा चिदानंद स्वरूपिणी ॥ बगलार्चा विधिं चैव वद मे
करुणाकर ॥१॥ ॥श्री ईश्वर उवाच ॥ ॥ सृष्टि स्थित्यं तु सं
हारा पूजा च त्रिविधा कलौ ॥ केवला सृष्टि पूजा च गर्भकौ
लागमे क्रमात् ॥२॥ अर्चनं गौड देशे तु स्थिति मार्गे कुमारक
॥ कामरूपस्य देशे तु संहारार्चनमेव च ॥३॥ गुप्त कौलागमे
नाम गौड देशार्चनो विधिः ॥ कामरूपागमे नाम संहारक्र
म पूजनं ॥४॥ गौडागमं चा वुलं व्य सांख्यायन मुनिस्तथा
॥ उक्त्वा नागमं चैव स्थित्यर्चां मृणु पुत्रक ॥५॥ सर्वांग सुंद
र स्यामां सर्वावयव शोभितां ॥ नवोढां पुष्पिणीं चैव प्रार्थ

येद्विप्रकन्यकां॥६॥ कृष्णाष्टम्यां चतुर्दश्यां पौर्णम्यां च कुमा
रक॥ अथवा भौमवारे वा निशायां भृगुवासरे॥७॥ स्ववासि
तेन तैलेन कुर्यादभ्यंगनं तथा॥ तूलिकातल्पमानीतां आ
स्तीर्यो दुकूलं खेपि च॥८॥ तस्योपरि समास्तीर्य त्रियामं मेजा भ्रि त्य
ति चंपकैः॥ कर्पूरैश्चैव कस्तूरीमिश्रितं चंदनं तथा॥९॥ स
र्वांगलेपनं कुर्यात् लक्ष्मीसूक्तेन बुद्धिमान्॥ पर्यंकोपरि त
त्कन्यां चंदनेन विलेपितां॥१०॥ ध्रुवा द्यौरिति मंत्रेण कन्यां
दक्षिणगोमुखीं॥ उन्मुखीं न्यायनं कुर्याच्छ्रीसूक्तेन कुमा
रक॥११॥ पादौ प्रसार्य तत्रस्थां गुप्तेनार्चनमाचरेत्॥ न्यस्ता २९
षोढाद्वयं चादौ वगलापंचकं न्यसेत्॥१२॥ कन्यां चैव न्यसे

देवं तत्तदंगानि संस्मरेत्॥ धनंजयपुरं चैव मार्जयेन्मूलविद्य
या॥१३॥ गंधद्वारेति मंत्रेण कुर्यात्कस्तूरिलेपनं॥ मूलमंत्रेण
सम्यक् पुष्पमालां समर्पयेत्॥१४॥ निवेदयेद्व्यंजनाद्वितं
त्रैव जपमाचरेत्॥ शतं वाथ सहस्रं वा मंत्रराजमिदं सुतं
॥१५॥ पुरश्चरणमध्येतु प्रतिभार्गववासरे॥ अथवा पौर्ण
मास्यां वा सौभाग्यार्चनमाचरेत्॥१६॥ प्रयोगसिद्धिदं पुंसां
मंत्रसिद्धिकरं परं॥ एतत्पूजां विना पुत्र प्रयोगो न भवेत्कलौ
॥१७॥ तस्मात्सर्वप्रयत्नेन प्रयोगार्थी च भूतले॥ सौभाग्या
र्चां विना पुत्र न भवेज्जपकोटिभिः॥१८॥ अभिमानाष्टकं त्य
क्त्वा त्यक्त्वा चैवेषणात्रयं॥ त्यक्त्वा पंचेंद्रियासक्तिं सौभाग्या

र्चनं माचरेत् ॥१९॥ सुखदुःखौ समौ हृत्वा लाभालाभौ जयाज
यौ ॥ त्रीणि गौणा समं गांछत्वा सौभाग्यार्चनमाचरेत् ॥२०॥
घोदाद्दयं च नज्ञात्वा यः करोत्यर्चनं भुवि ॥ पतितः स भवेत्पु
सा रौरवं नरकं व्रजेत् ॥२१॥ बाह्याभ्यंतरयोः पुत्र अभेदज्ञा
नयोर्विना ॥ सौभाग्यार्चनं कर्त्तव्या देवताज्ञापमाप्नुयात्
॥२२॥ संकल्पं च विकल्पं च त्यक्त्वा विद्यां नमान्न सः ॥ कुर्यात्सौ
भाग्यपूजां च नो चेद्भ्रष्टो भवेन्नरः ॥२३॥ जितेंद्रियः सुखेत्य
क्त्वा कुर्यात्सौभाग्यपूजनं ॥ सुखापेक्षेण यः कुर्याद्देवताज्ञा
पमाप्नुयात् ॥२४॥ स्वस्थावेत्रा विधिं चैव नज्ञात्वा कौलभे
दन ॥ यः करोत्यर्चनं विप्रः स विप्रः पतितो भवेत् ॥२५॥ करो ३०

तिचित्रसंक्षोभं गत्वा कन्यायाः कुमारक ॥ भ्रांतचित्तो भवेत्सोपि
वाचस्पतिसमोपि वा ॥२६॥ नोत्पादयेद्दुदनां च मनश्चैव नरा
रीरयोः ॥ वेदनां जनयेद्यस्तु सनरः पतितो भवेत् ॥२७॥ स्व
पत्नी भ्रातृपत्नी वा गुरुभार्या मथापि वा ॥ अर्चयेद्यो वनोपे
तां सांख्यायनं समर्पितं ॥२८॥ दीक्षालयस्थां वा रजकीं कुला
लगृहकन्यकां ॥ पुलिंदकन्यकां वैवम्नकं डुमतमादरात् ॥२९॥
अर्चयेदृषिपत्नीं च पूर्वोक्तां लक्षणैर्युतां ॥ अर्चनं विधिमार्गे
ण पूजादुर्वाससो मतं ॥३०॥ सर्वलक्षणसंयुक्तां पुष्पिणीम
र्चयेन्नरः ॥ मतंगमुनिनोक्तं च सद्यः सिद्धिकरं भुवि ॥३१॥
सिद्धमार्गमिदं पुत्र नास्ति सिद्धिर्गुरोर्विना ॥ तस्मात्सर्वप्र

यत्नेन अर्चयेद्धरुमन्यथा ॥३२॥ ॥ ॥ ॥ इति श्रीषड्विद्यागा
मे सांख्यायनतंत्रे चतुर्दशः पटलः ॥ ॥१४॥ ॥ ॥ क्रौंचभे
दन उवाच ॥ ॥राजराज सख श्रीमान् रजताद्रिनिकेतन ॥ पं वास्तिने२
चास्त्र विद्यां वद मे स्तंभनाख्यां सुपावनां ॥१॥ ॥श्रीईश्वर उ
वाच ॥ ॥आद्यरूपं वडवानामग्नी रणस्तंभनमेव च ॥उल्कामु
खी द्वितीयं च स्तंभने च जगत्त्रये ॥२॥ ज्वालामुखी तृतीयास्त्रं
स्तंभने ऋषिदेवतैः ॥आद्य वेदमुखी चैव चतुर्थास्त्रं कुमारक
॥३॥ ब्रह्मविष्णुमहेशाख्यस्तंभनं नात्र संशयः ॥ बृहद्भानु ३१
चमुख्यास्त्रं पंचमं च कुमारक ॥४॥ षट्पंच कोटि चामुंडा का
ली कोटि त्रातं स्तुत ॥ सपादकोटि त्रिपुरा स्तंभनास्त्रं तु पंचमं ॥५॥

तु पंचास्त्र ध्यानमंत्रं च तत्प्रयोगविधिं तथा ॥ व स्थेनत्स्योपसंहारं
सांतव छृणु पुत्रक ॥६॥ तारे च विलिखेत्पूर्वं स्तंभमायां ततः
परं ॥ वाराही शक्ति वाराही वगलामुखि चोच्चरेत् ॥७॥ ह्लां
ह्लीं ह्लूं ततोच्चार्य सर्वदुष्ट पदं लिखेत् ॥ नकारं दीर्घसंयुक्तं बि
दुनाश्लेषणं तथा ॥८॥ ह्लैं ह्लौं ह्लूं स्तनश्यो स्ता वाचं मुखं पदं वदे
त् ॥ स्तंभय द्वितयं चो स्का ह्लूः ह्लौं ह्लैं ततोच्चरेत् ॥९॥ जिह्वां की
लय उच्चार्य ह्लूं ह्लौं ह्लौं ततः परं ॥ बुद्धिं विनाशयोच्चार्य शक्ति
वाराहमुच्चरेत् ॥१०॥ वाराहं बगलाबीजं तारं वर्मास्त्र संयुतं
॥रणस्तंभनबाणं च दुर्लभं भुवि पुत्रक ॥११॥ पंचाशाद् ग्नरं पं
च बीजबद्धं सुपावनं ॥ ऋषिर्नेवीज मंत्रस्य वासिष्ठ श्लोदसं

पुनः॥१२॥पं तस्याख्यं देवता पुत्ररणस्तंभनकारिणी॥ न्यासवि
द्या च कर्त्तव्या पूर्वोक्तमंत्रराजवत्॥१३॥ध्यानं यत्नात्प्रवक्ष्यामि
वडवामुखिदेवतेः॥ पीतांबरधरां देवीं द्विसहस्रभुजान्वितां॥
१४॥सा ध्येया द्विगदां चार्थं धारयंतीं शिवां भजे॥ एवं ध्यात्वा ज
पेन्मंत्रमर्कलक्षं स बुद्धिमान्॥१५॥तारकेन्दुनेत्रलक्षं ब्राह्मणा
न्भोजयेत्ततः॥ राजाप्युद्भेदसामंतकोटिकोटिबलान्विता॥१६॥
निवीर्यो जायते सद्यो मंत्रशेषः पलायते॥ प्रयोगान्ते चैव सम्य
ङ्मंत्रसंस्कारमाचरेत्॥१७॥संस्कारेण विना मंत्रं साधक
स्य प्रमादकृत्॥ लोकालोकस्तंभनं च नाम्नी चोल्कामुखी त ३२
था॥१८॥मंत्रोद्धारं प्रवक्ष्यामि तारमन्मनः समासतः॥ तारं च
लक्ष्मीं मायां च शक्तिं वाराहमेव च॥१९॥बगलामुखिपदं चोक्त्वा बं१

सर्वत्राहं स्तनोच्चरेत्॥ दुष्टानां पदमुच्चार्य पूर्वबीजत्रयं वदेत्
॥२०॥वाचं मुखं पदं चोक्त्वा पूर्वबीजत्रयं वदेत्॥ स्तंभयाद्वि
यं चोक्त्वा पूर्वबीजत्रयं वदेत्॥२१॥जिह्वां कीलय युग्मं च पु
नर्बीजत्रयं वदेत्॥ बुद्धिं विनाशय युगं पुनर्बीजत्रयं वदेत्
॥२२॥वह्निजायासमायुक्तमुल्कामुखीमनोरिदं॥ पंचाशत्
दूर्ध्वं चैवाष्टबीजवर्णस्वरूपावर्न्न॥२३॥ऋषिश्चास्य स्तवाराहश्छं
दोनुष्टुप्तथैव च॥ उल्कामुखी देवता च जगत्स्तंभनकारि
णी॥२४॥बीजं च बगलाबीजं शक्तिः स्वाहा समन्वितं॥ कील
कं शक्तिवाराहं न्यासं पूर्ववदाचरेत्॥२५॥ध्यानं यत्नात्प्रव बं२
क्ष्यामि मंत्रभेदे कुमारक॥ विद्युदानलसंकाशां वीरावेश

न संभ्रतो ॥२६॥ विराएमयमहादेवीस्तो ननाथं भजाम्यहं ॥ ए
वं ध्यात्वा जपेन्मंत्रं मनुलक्षं कुमारक ॥२७॥ प्रपंचस्तन्मनं भू
त्वा स्वविद्याच प्रकाशयेत ॥ तारकेन्दुनेत्युत्रलक्षमेकं ह्रे
पासन ॥२८॥ मंत्रसिद्धिर्भवेत्तस्य त्रिलोकेकीर्तिमान्भवे
त ॥ तस्याज्ञया जगत्सर्वं स्थावरं जंगमात्मकं ॥२९॥ कुमार
क प्रवर्त्तते सर्वाश्चर्यकरं स्तुवि ॥ जीवं चतुर्विधं चैव एतन्मं
त्रस्य जाप्यके ॥३०॥ इछया वर्त्तते सर्वे सर्वमाश्चर्यमादरात्
॥ नदीनदाश्च निरया नानापादपसंकुलं ॥३१॥ किं तस्य
जीवयुक्तानि मह्याचरचां मनुः ॥ गोपयेन्मंत्रमेतद्धि क्रौं
चभेदनकोविद ॥३२॥ —॥ श्री —॥ इति श्रीषड्विद्यागमे सां
ख्यायनतंत्रे ईश्वरक्रौंचभेदनसंवादे चंडवामुखीकल्पा ३३

मुखीमंत्रहृदयोद्धारो नाम पंचदशः पटलः ॥ ॥१५॥ ॥ ॥क्रौं
चभेदन उवाच ॥ ॥ नमस्ते गिरिजानाथ मंत्रविद्यामयं प्रभो
॥ अधुना अस्त्रविद्यां च वद मे करुणाकर ॥१॥ श्रीईश्वर उ
वाच ॥ ॥ तारं च सं नमायां च प्रासादं च ततः परं ॥ पुनर्लिख
त्त्वध्यमायां प्रणवं च ततः परं ॥२॥ बगलामुखिपदं चैव क्रौं सर्व
दुष्टापदं वदेत् ॥ नकारं दीर्घसंयुक्तं बिंदुनाभूषितं तथा ॥३॥
बीजपंचकमुच्चार्य वाचं मुखं पदं वदेत् ॥ स्तंभय हृदयमुच्चार्य
पंचबीजं पुनर्वदेत ॥४॥ जिह्वां कीलय उच्चार्य पंचबीजं ततो
वदेत ॥ बुद्धिं नाशय युग्मं च पंचबीजं ततोद्धरेत ॥५॥ ज्ञानवें
दमुखीमंत्रं जगदाश्चर्यकारकं ॥ अर्कपंचकवर्णेन बद्धो यंत्रं

स्तंभनायकं ॥६॥ ऋषिः कालाग्निरुद्रश्च पंक्तिश्छंदमुदाहृतं ॥ जा
तवेदमुखी देवी देवता समुदाहृता ॥७॥ ॐ बीजं ह्रीं च शक्तिश्च
ॐ ह्रौं कीलकमुदाहृतं ॥ पूर्ववन्न्यासविद्यां च ध्यानं वक्ष्यामि पु
त्रक ॥८॥ जातवेदमुखी देवी देवता प्राणरूपिणी ॥ भजेहं स्तंभ
नार्थं च चिन्मयीं विश्वरूपिणीं ॥९॥ एवं ध्यात्वा जपेन्मंत्रं त्रि
वाल्लक्षं सुपावनं ॥ चर्मदृग्दर्शनो भूत्वा चिंतितार्थं जवेद्ध्रुवं
॥१०॥ गंधर्वाप्सरयक्षाश्च गरुडोरगपन्नगैः ॥ वेताल
डाकिनीप्रेता शाकिनीब्रह्मराक्षसैः ॥११॥ ऋषिदेवगणा
श्चैव सिद्धकन्याश्च पुत्रक ॥ ह्लीं जनं हित येचैत ह्रीं जं चैव त्रयो
दश ॥१२॥ बगलामुखि पदं चो ह्लां वदे ह्रीं जं त्रयोदश ॥ स
र्वं चमनोरेनं सत्यं शंकरभाषितं ॥१२॥ तास्वरूपं ब्रमायान्य वह्नि ३४
बीजस्य पंचकं ॥ प्रस्फुर २

वशं ह्रीं ततोच्चार्य दुष्टानां पदमुच्चरेत् ॥१३॥ बीजं त्रयोदशं चो
ह्लां वाचं मुखं पदं वदेत् ॥ ह्लीं जय हित येचो ह्लां पुन बीजं त्रयो
दशं ॥१४॥ जिह्वां कीलय युग्मं च पुन बीजं त्रयोदशं ॥ बुद्धिं नाश
य युग्मं च पुन बीजं त्रयोदशं ॥१५॥ वह्निजायासमायुक्तं ज्वा
लामुखि मे निरिद्ध ॥ ततो तत्रं न वेद्धिं श ह्रीं जव ह्रीं मनुस्तवयं
॥१६॥ अत्रिश्च ऋषिरेवात्र गायत्री छंद एव च ॥ ज्वालामुखी
देवता श्च स्तंभनो यत्रिमूर्तिभिः ॥१७॥ ध्यानं यत्नात्प्रवक्ष्या
मि न्यासं पूर्ववदाचरेत् ॥ ध्यानं विना भवेन्मूको सिद्धम
त्रोपि पुत्रक ॥१८॥ ज्वलत्पुंजसमायुक्तां कालानलसमप्रभां
॥ चिन्मयीं स्तंभिनीं देवीं जडोहं विधिपूर्वकं ॥१९॥ एवं ध्या

त्वा जपेन्मंत्रमर्कलक्षं सुबुद्धिमान् ॥ तर्प्पणं च गवां क्षीरैस्ताल
कैन दूनेत्सकृत ॥२०॥ तर्पणं चैव तुर्लक्षं लक्षमेकं दुनेत्सकृत ॥ स
हस्र द्वितयं चैव ब्राह्मणान्भोजयेत्सकृत ॥२१॥ त्रिमूर्त्तिः कथिते ज्ञेयो
न्मंत्रैः पंचतत्त्वान विचक्षणाः ॥ आश्चर्यदं महामंत्रं नराणां दुर्लभं
भुवि ॥२२॥ इदानीमस्त्रराजं च वह्यहह्वानुमुखाद्वयं ॥ मायोक्तं
न्ननु वाणं च आश्चर्यं च कलौ युगे ॥२३॥ तारं ह्रां ह्रीं ततोच्चार्य
ह्रूं ह्रैं ह्रौं च वततः परं ॥ ह्रूः इत्युच्चरेत्पश्च ह्रीं ह्रां ह्रूं च ततः प
क्रूं क्लैं क्लौं
रं ॥२४॥ ह्रैं ह्रौं ह्रः स्वनन श्री ह्रा बगलामुखि पदं वदेत् ॥ आ
द्यबीजं मनोः संख्या उद्धरेत्पुनरादरात् ॥२५॥ सर्वदुष्टानां ततो ३५
च्चार्य दुष्टानां पदमुच्चरेत् ॥ वाचं मुखं पदं चोच्चार्य स्तंभय द्वयमु

च्चरेत् ॥२६॥ आद्यबीजं मनोः संख्या उद्धरेत्पुनरादरात् ॥ जिह्वां
कीलय उच्चार्य पूर्ववद्बीज उद्धरेत् ॥२७॥ बुद्धिं नाशय उच्चार्य पूर्व
वद्बीजमुद्धरेत् ॥ वह्निजायासमायुक्तं ह्यहह्वानुमुखीमनुः ॥२८॥
एकोनत्रिंशद्वर्णोयं ह्यहह्वानुमनुः स्मृतः ॥ सवित्रश्च ऋषिश्चा
त्र गायत्री छंद एव च ॥२९॥ देवतास्तंभनास्त्रं च ह्यहह्वानुमुखी
तथा ॥ बीजं च बगला बीजं त्वां क्लिं मायाकुमारकं ॥३०॥ कील
कं प्रणवं चात्र विनियोगं च स्तंभने ॥ पूर्ववन्न्यासविद्यां च मं
त्रराजवदाचरेत् ॥३१॥ ध्यानं यत्नात्प्रवक्ष्यामि मंत्रभेदेन पुत्र
क ॥ कालानलनिभां देवीं ज्वलत्पुंजशिरोरुहां ॥३२॥ कोटिभा
नुसमायुक्तां वैरिजिह्वासमन्वितां ॥ स्तंभनास्त्रमयीं देवीं दृ

दर्पान्न प्रयोधरां ॥ ३३ ॥ मदिरामदसंयुक्तो हृदद्वानुमुखीं भजे
॥ एवं ध्यात्वा जपेन्मंत्रमकलं क्षं कुमारक ॥ ३४ ॥ न पर्ययेत्तु दृशां
त्रों च गुडोदकसमन्वितं ॥ तालकेन द्रुनेत्रस्य दशांशां सेस्स
ताग्निना ॥ ३५ ॥ ब्राह्मणान्भोजयेत्तुष्ट्या त्तदृशांशं कुमारक
मंत्रांते च प्रकर्त्तव्यं सौभाग्यार्चनमेव च ॥ ३६ ॥ सौभाग्यार्चां
विना पुत्र मंत्रसिद्धिर्न जायते ॥ पंचास्त्रमंत्रमेतद्धि दिवि देव
षु दुर्लभं ॥ ३७ ॥ गोपयेत्सर्वदा पुत्र गुह्याद्वीर्यवती भवेत् ॥ कैन
र्त्तव्यं प्रयोगादीन्न आपद्यदि कदाचन ॥ ३८ ॥ यः करोति प्रयोगा
णि देवताशापमाप्नुयात् ॥ ॥ ॥ ॥ इति श्रीषड्विद्यागमे ३८
सौरव्यायनतंत्रे पंचास्त्रविद्योद्धारो नाम षोडशः पटलः ॥ ॥

॥ ॥ १६ ॥ ॥ ॥ क्रौञ्चभेदन उवाच ॥ ॥ चंद्रचूड नमस्तोस्तु
इंदिरापतिसंस्तुत ॥ श्रीमान्क्षेरी महामंत्रं बगलायास्त्रमेव द
॥ १ ॥ ॥ श्रीईश्वर उवाच ॥ ॥ मंत्रोद्धारं प्रवक्ष्यामि पुरश्चर्याविधिं
तथा ॥ प्रयोगं चोपसंहारं वक्ष्येऽहं तव पुत्रक ॥ २ ॥ स्तंभमा
यां च वाग्बीजं मायामन्मथमेव च ॥ श्रीबीजं शक्तिवाराहं ब
गलामुखि चोच्चरेत् ॥ ३ ॥ स्फुरद्द्वयं तथा चोक्त्वा सर्वशत्रूंस्ततो
च्चरेत् ॥ दुष्टानां पदमुच्चार्य वाचं मुखं पदं वदेत् ॥ ४ ॥ स्तं त्र
यद्द्वयमुच्चार्य प्रस्फुरद्द्वयमुच्चरेत् ॥ विकटांगीपदं चोक्त्वा घो
ररूपी पदं वदेत् ॥ ५ ॥ जिह्वां कीलयउच्चार्य महच्छद्वं ततोच्चरे
त् ॥ पश्चाद्भ्रमकरी चैव बुद्धिं नाशयउच्चरेत् ॥ ६ ॥ विराणम

यिपदंचोक्ता सर्वप्रज्ञामयोच्चरेत ॥ प्रज्ञीनात्रायतउच्चार्यतन्म
दंकुरुयुग्मकं ॥७॥ मनोपहारिणीचोक्तास्तु नमायां समुद्धृ
त ॥ शक्तिवाराहबीजं च रमाबीजं ततःपरं ॥८॥ कामराजं च हल्ले
खां वाग्भवं तदनंतरं ॥ स्तं नमायां ततोच्चार्य वह्निजायासम
न्वितं ॥९॥ त्रातास्त्वरी महामंत्रं बगलानाम्नि पावनं ॥ ब्रह्माच्च
षिश्च छंदोयं गायत्रीसमुदाहृतं ॥१०॥ देवता बगलानाम्नी अ
नात्मा जनकारिणी ॥ ह्लीं बीजं शक्तिमायां च कीलकं वाग्भवं त
था ॥११॥ पूर्वोक्तं न्यासविद्यां च बगलापंजरादयः ॥ न्यसेदु
क्तक्रमेणैव जपाद्यं तो कुमारक ॥१२॥ पीतांबरधरां सौम्यां ३७
पीतभूषणभूषितां ॥ स्वर्णसिंहासनास्थां च मूलेकल्पत

रोस्तथा ॥१३॥ वैरिजिह्वाछेदनार्थं स्फुरिकां बिभ्रतीं शिवां ॥
पानपात्रं गदां पाशं धारयंतीं भजाम्यहं ॥१४॥ एवं ध्यात्वा ज
पेन्मंत्रं वेदलक्षं क्षपासनं ॥ तर्प्पयेद्दुग्धमिश्रेण वारिणा वाद
पुत्रक ॥१५॥ जातीफलं च संमिश्रं जलेन च कुमारक ॥ वेदामृते
च संतर्प्य अर्च्चितेन जलेन च ॥१६॥ त्रिमधुक्तं पायसेन अथ
वा पायसाज्ययोः ॥ चरुणा वा हुनेत्पुत्र पर्यायफलदायकं ॥१७॥
सर्षपेन हुनेत्पुत्र सहस्रं तत्वसंख्यया ॥ नानादेहजरोगांश्च
कृत्रिमग्रहसंभवान् ॥१८॥ चेटकांश्च प्रयोगांश्च त्राल्यदारुस
मुद्भवान् ॥ स द्योनात्रानमाप्नोति मंत्रयोगेन साधकैः ॥१९॥
त्राल्यसकृत्पतेनाक्तं च रामंतकुसुमेन वा ॥ षड्हस्रं हुनेत्पुत्र

सं
खंडिले वाथ कुंडके ॥२०॥ वशीकरं च मोहं कीर्त्तिप्रज्ञा भवेद्ध्रु
वं ॥ कुंडं च योनिगाकारे च चिताग्नौ करौ निशि ॥२१॥ स्तंभनं च
भवेत्सत्यं नात्र कार्या विचारणा ॥ अर्कैश्च पिचुमंदैश्च समि
धाभिर्गृहेन्नरः ॥२२॥ प्रत्येकं च त्रिसाहस्रं प्रादेशा समिधात्र
मात्रं ॥ मंत्रं सर्वसमुच्चार्य समिधाहुयमेव च ॥२३॥ हुने ध्या
नसमायुक्तं सद्यो विद्वेषणं भवेत् ॥ बिभीतकसमिद्धाहुत्यं त्रि
सहस्रं कुमारक ॥२४॥ षट्कोणकुंडे जुहुयान्निशायां कृष्णप
क्षके ॥ स्त्री वराणि रयश्च वनदीपादपसंकुलान् ॥२५॥ स्मशा ३८
दुच्चाटनं कुर्याद्धोमाख्यास्यप्रभावतः ॥ निंबतैलेन संयुक्तं
वा ॥ ल्मलीकुसुमेन तथा ॥२६॥ जुहुयादयुतं धीमान्मारणे भ

वति ध्रुवं ॥ ॥ ॥ ॥ इति श्रीषड्विद्यागमे सांख्यायनतंत्रे
ईश्वरक्रौंचभेदनसंवादे बगलाक्रमोक्षरीमंत्रोद्धारषट्कर्मनि
र्माणं नाम सप्तदशः पटलः ॥ ॥१७॥ ॥ ॥ क्रौंचभेदन उवा
च ॥ ॥ सत्यज्ञानमयं साक्षान्नित्यानित्यस्वरूपक ॥ चंद्रचूड
नमस्तेस्तु प्रयोगं वद मे प्रभो ॥१॥ ॥ श्रीईश्वर उवाच ॥ ॥ षट्
सहस्रं हुनेत्पुत्र दूर्वाहोमसमर्द्धितः ॥ स यस्मा पज्वरं हंति बग
लायाः प्रभावतः ॥२॥ कुशेन जुहुयात्पुत्र शीतज्वरहरं परं ॥ हु
नेत्तावच्चतुर्वज्वरं चातुर्थिकं हरेत् ॥३॥ त्रिमधुक्तैश्च दूर्वा
षट्सहस्रं हुनेत्क्रमात् ॥ नानाविधज्वरं हंति नात्र कार्या विचा
रणा ॥४॥ दधिमिश्रगुडूचिस्तु चतुरंगुलसंमिते ॥ जुहुयात्स

सहस्रं तु नानामेह निवारणं ॥५॥ सर्षपं लवणोपेतं पूर्ववज्जुहु
यान्नरः ॥ नाशयेद्गुल्मरोगं च वौषधेन विनाऽर्भक ॥६॥ षट्स
हस्रं हुनेत्पुत्र त्वाकैराज्य समन्विते ॥ पैत्योद्भवानने कांश्च रोगा
न्नाशयते ध्रुवं ॥७॥ शालिसक्तुघृतोपेतं वशीकरमवाप्नुया
त् ॥ लाजैर्हुनेत्षट्सहस्रं लभेद्वांछितकन्यकां ॥८॥ हरिद्राखंड
मन घ हुनेत्तावत्स बुद्धिमान् ॥ गर्भस्त्रीभोभवेन्नारी सापि
वंध्या भवेद्ध्रुवं ॥९॥ केतकीदलहोमेन गणिकावशमाप्नुया
त् ॥ हुनेत्पद्मदले नैव नेत्ररोगे विनश्यति ॥१०॥ मल्लिकाकुसु
मेनैव शत्रुभ्रांतमतिर्भवेत् ॥ जानीफलेन जुहुयाद्दम्भतो जा
यते रिपुः ॥११॥ षट्सहस्रं देवकुसुमं हुनेच्च घृतसंयुतं ॥ उद्वे ३९

गं चैव चांचल्य मुच्चाटनमतिस्तथा ॥१२॥ अविवेकं स्फुटद्बु
द्धिर्विपमूत्रीमंदं धीस्तथा ॥ क्षणान्नाशयमाप्नोति तमः सूर्यो
दयस्तथा ॥१३॥ मांसं कुक्कुटसंभूतं त्रिमधुप्लुतमेव च ॥ अयु
तं जुहुयाद्रात्रौ सद्यो धनपतिर्भवेत् ॥१४॥ त्रिमधुक्तं छाग
मांसं त्रिसहस्रं हुनेत्क्रत ॥ भूलाभेच भवेच्छीघ्रं ग्रामाधिप
तिरेव वा ॥१५॥ गौडीद्रव्येण जुहुयात्सहस्रं बाणसंख्यया
॥ वद्धमूत्रादिरोगाश्च नाशयंति न संशयः ॥१६॥ माध्वी
द्रव्येण जुहुयात्षट्सहस्रं क्रमेण च ॥ ज्वरातिसाररोगं च
सद्यो नाशनमाप्नुयात् ॥१७॥ पैष्टीद्रव्येण जुहुयान्निशि त्रि
ग्र षट्सहस्रकं ॥ शीघ्रं संग्रहणीरोगं सद्यो नाशनमाप्नुया

त्॥१८॥ अन्नेन अन्नयान्भूत्वा अन्नदान परो भवेत्॥ घृतेन
कोतिमान्भूत्वा नारीणां मन्मथो भवेत्॥१९॥ क्षीरेण भ्रम
नाचांच दग्धा तापविनाशनं॥ पंचगव्येन जुहुयात्पूर्ववत्ता
पशांतये॥२०॥ गोमूत्रेण हुनेन्मंत्री षड्हस्वं क्रमेण च॥ वि
दाहे च भवेन्नित्यं रिपुभ्रांतो भविष्यति॥२१॥ तालीमृद्येन जु
हुयात्स्त्रीणामाकर्षणं भवेत्॥ खर्जूरेण तु मद्येन पुंसामाक
र्षणं भवेत्॥२२॥ तिलतैलेन जुहुयात्सर्वाकिर्षणमाप्नुयात्॥
एरंडतैलहोमेन गजाकर्षणमाप्नुयात्॥२३॥ कुसुंभतैलहो
य मेन पूर्वहोममात्रतः॥ अलक्ष्याश्चैव योभेद भवेदाकर्षणं कृ ४०
त॥२४॥ करंजबीजतैलेन काकगृध्रादि नेकशः॥ आकर्षणं

भवेच्छीघ्रं खेचराः पक्षिजातयः॥२५॥ यावनालान्न होमेन अग्नि
मेदो रिपु स्वयं॥ रोगी च जायते वास्या छिवस्य वचनं यथा॥२६॥
जुहुयादारनालेन पैत्यरोगी भवेद्रिपुः॥ निंबपत्रद्रवेणैव
वातरोगी भवेद्रिपुः॥२७॥ मोहिनीपत्रजद्रावैः कुष्ठरोगी भवे
